श्री॰ भा॰ पं॰ टी॰ १

ॐ श्रीगणाधिपतये नमो नमः ॐ अथातः पंचमस्कंधव्याख्यानेकविशेषवान् प्रियव्रतान्वयो यत्र सप्रपंचः प्रपंच्यते
षड्विंशत्याथुनाध्यायैः पंचमे स्थानमीर्यते लोकद्वीपादिमर्यादापालनाख्यमनेकधा इष्टश्च पर्यथा लोके मर्यादा
त्रिविधा मता पुनश्चैकैकशस्तेषु मर्यादा बहुधा मता भुवि द्वीपादिमर्यादः पाल्यते राजभिः पृथक् भूमेरुपरि देवाये
स्तैः श्चायो मरादिभिः तत्राध्यायैः त्रिविंशत्या प्रियव्रतपुरःसरैः भुवो द्वीपादिमर्यादापालिता इति वर्ण्यते त्रिभिः
सूर्यादिभिर्ज्योतिश्चक्रादिस्थितिकीर्त्यते अतलादिषु भावाद्यैः पालनं च ततस्त्रिभिः तत्र तु प्रथमेध्याये तानितो राज
निर्वृतिः पुनश्च ज्ञानमिष्टेति प्रियव्रतकथाद्भुता वंशः प्रियव्रतस्यापि निबोध नृपसत्तम यो नारदादात्मविद्याम
भिगम्य पुनर्महीं भुंक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदमिति पूर्वस्कंधान्ते उक्तं प्रियव्रतस्य प्रथममात्मविद्या

राजोवाच प्रियव्रतो भागवत आत्मारामः कथं मुने गृहेरमत
यन्मूलः कर्मबंधः पराभवः १ न नूनं मुक्तसंगानां तादृशानां द्वि
जर्षभ गृहेष्वभिनिवेशोयं पुंसां भवितुमर्हति २ महतां खलु वि
प्रर्षे उत्तमश्लोकपादयोः छाया निर्वृतचित्तानां न कुटुंबे स्पृहाम
ति ३ संशयोयं महान्ब्रह्मन्दा रागारसुतादिषु सक्तस्य यत्सि
द्धिरभूत्कृ ष्णे च मतिरच्युता ४

ततो गृहाश्रमः ततः संगे त्यागः मो तइत्युक्ते तत्र विस्मितः पृच्छति प्रियव्र
तो भागवतः अतएवात्मारामः गृहे कथमरमत ननु रमतां को दोष इति वदन्नाह कर्मणां बंधः परोभ---स्व
पतिरस्कारो यन्मूलो भवति ननु गृहमूलेष्वपि तस्य गृहेषु रतिश्च तत्राभिनिवेशः स्यात् स च भागवतानामात्मारामा
णां न संभवतीत्याह नूनमिति २ गृहासक्तिर्हि कुटुंबस्पृहया भवति सा च तेषां नास्तीत्याह महतामिति उत्तम
श्लोकपादयोः छाया कामादिसंतापापहारिणी तया निर्वृतं येषां स्पृहायुक्ता मतिर्नास्ति दारादासक्तस्य तु मोक्षः
सिद्धिः कृष्णे च अस्खलिता मतिश्चाभूदिति यत् अयं च महान्संशय इत्याह संशय इति ४ ॐ नमो भगवते हनुमानाय राम
अंजनीसुताय वायुसुताय लक्ष्मणप्राणदाताय सीताशोकविनाशकाय दशग्रीवस्य दर्पहाय ॥ १

श्रेणीकृत्य परिहरति बाढमीभविवेषादिकं नास्तीति सत्यमेव तथापि विघ्नवशेनैतेषां प्रवृत्तिः पूर्वाभ्यासबलेन पु
नर्निवृत्तिश्च सम्भवतीत्याह भगवतः श्रीमच्चरणारविंदमकरंदरूपो यो रसः तस्मिन्नावेशितं चेतो यैः तेषां केनचि
दंतरायेण विघ्नेन विहताअपि स्वां शिवतमां पदवीं मार्गं न हिन्वंति न त्यजंति कांतां भागवतानां परमहंसानां तेषां
दयितं तस्य प्रियस्य श्रीवासुदेवस्य कथां न त्यजंति ५ प्रियव्रतस्य ब्रह्मा तैवीतरायत्वप्रावश्च वेति सप्रसंगमाह य
र्हीत्यादिना विशुक्रमः संगः प्रवृत्ति मनसेत्यनेन यर्हि वाव ह यदाहि वावेति प्रसिद्धौ हेति च सः स्वपित्रामंत्रनाप्रवनि

शुक उवाच बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरसआवेशितचेतसो भागवतपरम
हंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ५ यर्हि वाव ह राजन्
स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दी
क्षिष्यमाणोवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपामंत्रितो भगव
ति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनंदद्यद्यपि तद
प्रत्याम्नातव्यं तदधिकरण आत्मनोन्यस्मादसतोपि पराभवमन्वीक्षमाणः ६ अथ ह भगवानादिदेव ए
तस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगण
परिवेष्टितः स्वभवनादवततार ७ स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढै
रभिपूज्यमानः पथि पथि च वरूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानो गंधमादनद्रोणीम

तलपरिपालनाय उपामंत्रितो विमुक्तो नैवाभ्यनंदत् नैच्छत् अथाहतदेव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्य
न्वयः उपामंत्रणे हेतुः आम्नातः शास्त्रप्रशस्तो गुणाः ये प्रवराः श्रेष्ठाः गुणाः तेषां गणस्यैकांतभाजनतया नियतान्वयते
नप्रतिषेधायां हेतुः परमार्थसतत्त्वे आत्मयाथात्म्ये अवगतं तेन येन ---- अतः ब्रह्मसत्रेणात्मध्यानेन कार्येण दीक्षि
ष्यमाणः नियमं ग्रहीष्यन् भगवति वासुदेव एव निरंतरं समाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकल
कारकाणामिंद्रियाणां याः क्रियाः तासां कलापो येन सः यद्यपि तत् पित्राज्ञेनप्रत्याख्येयं तथापि तदधिकरणे राज्या
धिकारे असतोपि मिथ्याभूतादपि राज्यप्रपंचादात्मनः पराभवं मालिन्यं पश्यन्नाभ्यनंदत् ६ गुणविसर्गस्य गुणस्रष्टेः प

गुणाब्धिमर्गीसगुणाश्रेष्ठः परिबृंहणंसमृद्धिः तदनुवितयत्रव्यमितः सकलजगतामभिप्रायोयेनसः यथाराजाचौरेर्मे
उलेखराणामभिप्रायानिश्चीयतेतद्वत् श्रीवलेनिगमेसूत्रेतिमद्वीदेवनिजगोगोसुरीक्ष्याभिपरिहृतः सत्यलोकादवतो
णीः २ सतत्रवत्मानडउपविहितदिविश्रकाशमानोगयरू------------भामयत्रुपममपेत्यन्वयः अमरपरिदृद्ः देवगादि
भि ८ हेसयानेनोपलक्षितानेनपितरमुपलभमानः सत्पिता पुमितेन शान्त्यनपिता पुत्राभ्यामनुप्रियव्रताभ्यांसहस्नारदः
कृतांजलिः सन्नुसहंसेवाभ्युत्थायार्हणेनभजयामहसोपनस्यलेनप्राव प्रियव्रतेलक्षामरदरगोपायानादउपदिशति
मनुष्वितेवत्रमागतोस्तीतिज्ञातव्य ९ हेभारतभगवानादिपुरुषोब्रह्मानप्रियव्रतमितिहोवाचेत्यन्वयः तेनारदोनापा

तत्रहपयायंनेदेवर्षिहंसयानेनपितरंभगवंतंहिरण्यगर्भमुपलभमानः सहसैवाभ्युत्थायार्हणेनसहपितापु
त्राभ्यामवहिताञ्जलिरुपतस्थे ९ भगवानपिभारततउपनीतार्हणः सूक्तवाकेनातितरामुदितगुणग
णावतारसुजयः १० प्रियव्रतमादिपुरुषःतंसदयहासावलोकइतिहोवाच श्रीभगवानुवाच निबोध
तातेदमृतंब्रवीमिमासूयितुंदेवमर्हस्यप्रमेयं वयंभवस्ततएषमहर्षिर्वहामसर्वेविवशायस्यदिष्टं ११
नतस्यकश्चित्तपसाविद्ययावानयोगवीर्येणमनीषयावा नैवार्थधर्मैःपरतःस्वतोवाकृतंविहंतुंतनुभृद्वि
भूयात् १२ ॥

तीतमहत्वंयस्यसः सूक्तवाकेनयथोचितवाक्येनअतिशयेनउदितावर्णितागुणगणाः अवतारसुजयाः स
र्वोत्कर्षोयस्य १० प्रवृत्तिनिष्ठमहावाक्यमतिकूलमनात्मभ्यमयोक्तविष्यतीतिशंकमानोनाहमेवंवदामि किंतु
मन्मुखेनहरिरेवत्वामाज्ञापतीतिवदन्प्रवृत्तिनिवृत्तिरहस्यमाहनिबोधेतित्रिभिः ऋतंसत्यमप्रमेयंदेवंअसूयितुं
दोषारोपेणाद्रष्टुंनार्हसितन्नःतातनयमवत्कुरुश्चमहर्षिः दिष्टंआदिष्टमाज्ञाविवशाअस्वतंत्राः संतोवहामः ११ वि
वशत्वमेवाहचतुर्भिर्नेतितस्यकृतंतेननिर्मितंतनभृज्जीवःतपआ
दिभिर्विहंतुंअन्यथाकर्तुंनविभूयात् प्रभुर्नभवे
त्मनीषयासमाधिबुद्धिबलेनपरतःब
लेनपरतःबलवदाश्रयात् १२

तत्र देहयोगे तावत्पारतंत्र्यं प्रसिद्धमित्याह भवो जन्म भवाद्यर्थं अव्यक्तेनेश्वरेणादिष्टं दत्तं देहयोगं जनता जीवसमूहः
सदा धत्ते न तु तं अन्यथा कर्तुं शक्नोतीत्यर्थः हे प्रियव्रत १३ कर्मकरणेपि पारतंत्र्यमाह यद्वाचीति यस्य वाचि वेदलक्ष-
णायां तंत्यां दामन्यां गुणाः सत्त्वादयः तत्स्वरूपाणि च यानि कर्माणि तन्निबंधनेदामभिः ब्राह्मणादिशब्दैः सुदृढसूत्रैः
सुदृढैः हे वत्स वयं सर्वे सुयोजितानि युक्ताः संतः तस्मा ईश्वराय बलिं वहामः तदिच्छया कर्म कुर्म नसि नासिकायां
प्रोता बद्धाः संतः चतुष्पदो बलीवर्दाः यथा द्विपदे पुरुषाय १४ भोगेष्वपि पारतंत्र्यमाह ईशेन ईश्वरेणाभिसृष्टं द-
त्तमेव दुःखं सुखं वा अवरुंध्महे स्वीकुर्मः यथा स्वामिना दत्तमेव कणिशादि बलीवर्दो भक्षयति न स्वेच्छया तद्वत् न

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग
धत्ते १३ यद्वाचि तंत्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः सर्वे वहामो बलिमीश्वराय प्रोता न-
सीव द्विपदे चतुष्पदः १४ ईशाभिसृष्टं ह्यवरुंध्महेंग दुःखं सुखं वा गुणकर्मसंगात् आस्थाय तत्तद्यदयुं-
क्त नाथश्चक्षुष्मतांधा इव नीयमानाः १५ मुक्तोपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः य-
थानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते १६ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्-
सपत्नः जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् १७ यः षट् सपत्नान् विजिगीषमाणो गृ-
हेषु निर्विश्य यतेत पूर्वं अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् १८ त्वं त्वब्जनाभांघ्रि-
सरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः भुंक्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसंगः प्र

एवं वैराग्यमीश्वरस्य यतो गुणकर्मसंगात् नाथो यद्यद्देवतिर्यगादिलक्षणं देहं अयुंक्त योजितवान् तत्तदास्थाय स्वी-
कृत्य यथा अंधाः चक्षुष्मता आत्मवशेन नीयमानाः संतः १५ ननु तत्सर्वं मा विदुष एव न त्वात्मविद इत्याशंक्याह
मुक्तोपीति यावदारब्धं कर्म तावद्यथा स्वप्नं अनुभूतं प्रतियातनिद्रः गतनिद्रः अभिमानशून्यः अनुस्मरति तद्वत् हि भो-
गवासनया पुनर्जन्म भवेत् तत्राह किं तु देहांतरारंभकगुणान् कर्माणि वासनया पुनर्न वृंक्ते न संभजते १६ ननु गृहेषु व-
र्तमानस्य भोगान् भुंजानस्य कृताभिमानाभावो मोहतो वा यतस्त्यागेन वनवासप्रवणः तत्राह भयमिति गृहवनवासादयः प्र-
मत्तस्य अजितेंद्रियस्य वनेष्वपि स्यादिति संगभयाद्वनादन्यत्र गच्छतापि यतः सहैव षट् सपत्ना मनःषष्ठानि ज्ञानेन्द्रियाणि

श्रीः
भा॰ पं
टी॰
३

वयस्यमत्तस्याभूतपवनेष्वपियतआस्तेबुद्धिवेनजितेंद्रियत्वात्‌ आत्मारामस्यावद्यंरागादिदोषंकिंकरोतिनकोप्ये
तु १७ ननुगृहेरागादयः संभवंतिनतुवनेऽत्याशंक्याहभयमिति योयंःषट्‌वैरिणः षडिंद्रियाणिविजिगीषमाणःसप
वैगृहेषुप्रविश्यतेषामत्यंतनिरोधप्रऊर्वंजेतयतेत क्षीणेषुरिपुकामंगृहेन्यत्रवाविचरेत्‌ यतोलोकेऽर्जितारीनऽ
र्गाश्रितएवात्येतिजयतिएवमात्रऽर्गेवान्यत्रवावर्ततइयुध्यतेतिपाठेप्रक्रमेदित्यर्थः १८ इत्थंचगृहेदुर्गाश्रयणंप्राकृता
नांचेत्‌त्वंअब्जनाभस्यअंघ्रिसरोजकोशएवदुर्गंतदाश्रितःअतएवनिर्जितषट्सपत्नस्तथापिपुरुषेणेश्वरेणातिदिष्टान्‌
दत्तान्‌भोगांस्तावत्‌भुंक्ष्व पश्चाद्विमुक्तसंगःसन्‌ प्रकृतिंस्वरूपंभजस्व आत्मनिष्ठोभवेत्यर्थः १९ आत्मनःस्वस्यल
घुतयाअल्पतयायद्वाआत्मनायदनुशासनंतत्‌ अलंघुतयागौरवेणबाढंतथाकरिष्यामीति अवनतकंधरःसनृज

शुकउवाच इतिसमभिहितोमहाभागवतोभगवतःत्रिभुवनगुरोरनुशासनमात्मनोलघुतयावनतशिरो
धरोबाढमितिसबहुमानमुवाह २० भगवानपिमनुनायथावदुपकल्पितापचितिःप्रियव्रतनारद १
योरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसंक्षयमव्यवहृतंप्रवर्तयन्नगमत्‌ २१ मनु
रपिपरेणैवंप्रतिसंधितमनोरथःसुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितगुप्तयआस्थाप्यस्वय
मतिविषमविषयविषजलाशयाशाया उपरराम २२ इतिहवावसजगतीपतिरीश्वरेच्छयाधिनिवेशि
तकर्माधिकारोखिलजगद्बंधध्वंसनपरानुभावस्यभगवतआदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभा

वाह २० मनुनासंतुष्टेनउपकल्पितापूजायस्य प्रियव्रतस्ययोगभ्रंशात्‌नारदस्यचशिष्यनाशात्‌कुटिलमीक्षमाणयोःसंभवतितत्तुनास्तीत्याह अविषमंयथा।
तयोरभिसमीक्षमाणयोःसतोरात्मनःसम्यगवस्थानंअवाङ्मनसंवाङ्मनसयोरविषयंजनपदनिवासंपाठांतरेअवाक्‌वाचामगोचरंकथंचिन्मनसासत्यंविषयं
अतएवअव्यवहृतंव्यवहारशून्यंब्रह्मनिष्ठंप्रवर्तयन्व्यवहाराद्विलक्षणःसन्व्यवहारातीतंस्वरूपंचिंतयन्नंतर्हितइत्यर्थः २१ पुत्रंराज्येभिषिच्यवनंया
स्यामीतियोमनोरथःसःपरेणब्रह्मणैवप्रतिसंधितःसंपादितोयस्यसः नारदस्यानुमतेनस्थापयित्वा अतिविषमोदुस्तरोयोविषयविषजलाशयोगृहं
तस्यआशाआदिकप्रवृत्तिवासनाअस्यमेवर्तितिनाभोगेच्छावातस्याउपरतोबभूव २२ यत्तुष्टंगृहेकथमरमत तत्रोक्तमुत्तरमुपसंहरतिइतिहवावइत्यसमवर्ति
अधिनिवेशितःप्रापितःकर्माधिकारोयस्यअखिलस्यजगतोबंधध्वंसनपरोनुभावोयस्ययदंघ्रियुगलंतस्यानवरतंध्यानेनतदनुभावेनपरिरंधितकषा
योदग्धरागादिमलत्वाशयोयस्यअतोवदातःशुद्धोपिब्रह्मादीनामाज्ञापालनेनमानवर्धनः २३ ॥

उरुतिविस्मये ह इति प्रसिद्धौ वा एवेति निश्चये २३ आत्मनः समानैः शीलादिभिः उदारान्महतो दश पुत्रानजनयामा
स २४ तानाह आग्नीध्रः इध्मजिह्वः यज्ञबाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः
कविरित्येतानि अग्निनामानि येषां ते २५ अर्भभावादाल्यादारभ्य २६ तस्मिन्पारमहंस्याश्रमे श्रीमच्चरणारविंदयोरवि

अथ उरु वा ह दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम २३ तस्यामु ह वाव आत्मजानात्म
समानशीलगुणकर्मरूपवीर्योदारान् दश भावयांबभूव कन्यां च यवीयसीमूर्जस्वतीं नाम २४ आग्नी
ध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामा
नः २५ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसः त आत्मविद्यायामर्भभावादारभ्य कृत
परिचयाः पारमहंस्यमेवाश्रममभजन् २६ तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनि
कायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविंदाविरतस्मरणाविगलितप
रमभक्तियोगानुभावेन परिभावितांतर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवा
त्मनस्तादात्म्यमविशेषेण समीयुः २७ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इ
ति मन्वंतराधिपतयः

२८

रतस्मरणेनाविगलित अखंडितो यः परमो भक्तियोगः तस्यानुभवेन विशोधितं अंतःकरणं तत्र धृतीतो यो भगवांस्तस्मिन्ना
त्मनस्त्वंपदार्थस्य तादात्म्यमविशेषेण विशेषो देहाद्युपाधिः तदपोहेन प्रापुः ॥

श्रीः
भा· पं·
टी·
५

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्बुदं तेन गणनानि वर्षाणामेकादशार्बुदानि जगतीं बुभुज इत्यन्वयः
राज्ञो धर्मपालनमाह अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात् तेन सारेण बलेन संभृतौ श्रेष्ठौ
दोर्दंडौ तयोर्युगं तेनापीडित आकृष्टो मौर्वीगुणस्तस्य स्तनितं टंकारः तेनैव युद्धं विनापि विरमिता निरस्ता धर्म
प्रतिपक्षा येन भोगातिशयमाह वर्हिष्मत्याः स्वभार्यायाः अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमान
विवेक इव अनन्यपूर्वविषयासक्त्यात्मानमनवबुध्यमान इव बुभुजे तत्प्रमोदयतिहृष्टाः हृः ततः प्रसरत्समस्त

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याह
ताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो व
र्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्या
दिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे २८ यावदवभा
सयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा
हि भगवदुपासनोपचितातिपुरुषप्रभावः तदनभिनंदन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दि
नं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद् द्वितीय इव पतंगः २९

त्यादिलीला ततो यौषिण्यं योषित्स्वभावः शृंगारानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः संकोचि
ताः हासावलोकाः ततो रुचिरक्ष्वेल्यादयः परिहासवाक्यादीनि तैः २८ प्रभावातिशयमाह यावदसुधातलं
लोकालोकपर्यंतमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यः तस्मिन्नर्धेनैवोपलक्षिते प्रतपति प्रकाशयति अ
र्धेनैवावच्छादयति तमसा आश्लेषयति तदा द्वितीयः पतंगः सूर्य इव परिक्राममनुपरिक्रामति न चेदं सम्भावितं
यतो भगवदुपासनेनोपचितः अतिपुरुषः पुरुषानतिक्रान्तः प्रभावो यस्य २९ ॥

येवेउहस्रुतिप्रसिद्धाः तस्यरथचक्राग्रकृताः परिखाताः गर्ताः यतः येएवकृताः ते ३० तेषांपरिमाणंपूर्वस्मादितिशेषः सर्वस्य
विस्तारमानं उत्तरस्ततोद्विगुणेनविस्तारमानेनेत्येवंसिंधुभ्योबहिः समंततउपक्लृप्ताः रचिताः ३१ यथासिंधुभ्योबहिरेके-
कशोद्वीपाः एवंद्वीपानामपिबहिः सिंधवइत्याह क्षारोदेति दधिमंडोमथितंदधिपते सप्तजलधयः सप्तद्वीपानांपरिखा

येवाउहतद्रथचरणनेमिकृतपरिखातास्तेसप्तसिंधवआसन् यतएवकृताः सप्तभुवोद्वीपाः ३० जंबूप्लक्षशा-
ल्मलिकुशक्रौंचशाकपुष्करसंज्ञाः तेषांपरिमाणंपूर्वस्मात् उत्तरउत्तरोयथासंख्यंद्विगुणमानेनबहिःसमं-
ततःउपक्लृप्ताः ३१ क्षारोदेति दधिमंडोमथितंदधिपते सप्तजलधयः क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमं-
डोदशुद्धोदाः सप्तजलधयः सप्तद्वीपपरिखाइवाभ्यंतरद्वीपसमाः ३२ एकैकशोनयथानुपूर्वंसप्तस्वपिबहि-
र्द्वीपेषुपृथक्परितउपकल्पिताः तेषुजंब्वादिषुबर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहि-
रण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येन एकैकस्मिन्नेकमेवाधिपतिंविदधे ३२ दुहितरंचो-
र्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीनामकाव्यसुता ३३ नैवंविधःपुरुषाकारउरुक्रमस्यपुंसां

तदंघ्रिरजसाजितषड्गुणानां चित्रंविदूरवि

गतःसकृदादीतयन्नामधेयमधुना

सजहातिबंधम् ३४

इवाभ्यंतरैः संवेष्टितायेद्वीपाः तैःसमानाविस्तारतः बहिर्गताः पृथक्सर्वसंकीर्णतया ३३ अहोआश्चर्यंराज्ञःसामर्थ्य-
मितिपरीक्षिद्विस्मयायमानंभगवान्बादरायणिराहनैवमिति जिताःषड्गुणाइंद्रियाणिषडूर्मयोवायैःतेषामेवंविधःपु-
रुषाकारइतिनचित्रंनासंभावितंयतोविदूरविगतः अन्त्यजोपियस्योरुक्रमस्यनामसकृदुच्चारयेद्यःसद्यःपुनातित्क्षण-
मेवबंधंसंसारंतत्क्षणमितिपाठेपूर्वमेवार्थः पाठांतरेतत्क्षणंचांडालबंधंजहातिविमुक्तोभवतीत्यर्थः ३४

श्री: भा-पं टी- ५

तस्यपराक्रममनुवर्णयन्निवृत्तिक्रममाह सएवमितिदेवर्षिचरणयोरनुशयनमुपसत्तिःतदनुपतितोयोगुणविसर्गो
राज्यादिप्रपंचःतत्सर्गेणात्मनिमनसिनिर्वेदोयस्य ३५ तमाहमथाप्रसाध्वनुष्ठितंयद्यतोऽभिनिवेशितःतत्ततः
अलमलंविषयैःविनोदमृगंमर्कटं ३६ परदेवतायाःहरेःप्रसादेनाधिगतःआत्मनःप्रत्यवमर्शोवि
वेकःतेननारदस्यपदवींतदुपदिष्टमार्गमेवपुनरनुससारेत्यन्वयः किंकृत्वाअनुगतेभ्यःइमांपृथिवींविभज्यभु

सएवमपरिमितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवा
त्मानंमन्यमानःआत्मनिर्वेदमिदमाह ३५ अहोअसाध्वनुष्ठितंयदभिनिवेशितोऽहमिंद्रियैरविद्यारचि
तविषमविषयांधकूपेतदलमलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार ३६
परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यःपुत्रेभ्यइमांयथादायंविभज्यभुक्तभोगांचमहि
षींमृतकमिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृदिगृहीतहरिविहारानुभावोभगवतो
नारदस्यपदवींपुनरेवानुससार ३७ तस्यहवाएतेश्लोकाः प्रियव्रत नकृतंकर्मकोनुकु
र्याद्विनेश्वरं योनेमिनिम्नैरकरोच्छायांघ्नन्सप्तवारिधीन् ३८

क्तभोगायस्यांतां महाविभूतिःसाम्राज्यसंपत्तत्सहितांमहिषींमृतशरीरमिवपरित्यज्यनवरक्तेनःहृदिनिहितो
निर्वेदोयेन हरीयस्योऽनुग्रहोप्यन्वयःहृदिगृहीतोनिश्चितोहरिविहारस्तेनानुभावस्त्यागसामर्थ्यंयस्य ३७
तस्यमहिमोपवर्णनेवदन्श्लोकाः सर्वविदःकथ्यन्तेयथावेदेतदप्येषश्लोकोभवतीतिकोनुकोनामकुर्याद्वा
योविघ्नवन्तमोनिरस्यन् ३८

भूसंस्थानं द्वीपैः कृतं सरिद्गिरिवनादिभिः सीमा च येन कृता भूतानां निर्वृत्यै सुखाय अविवादाय ३९ भौमं पातालं दिव्यं
स्वर्गं मानुषं मर्त्यलोकं च महिमैवं वैभवं योनिरयं तल्ल्यंसेने पुरुषानुजनाः विमुखभक्तास्तं पवं श्रियायसेति ४० इति भा
वार्थदीपिकायां पंचमस्कंधे प्रथमोध्यायः १ द्वितीये प्रोक्तमाग्नीध्रचरित्रं तत्र तु पत्न्यां हि पूर्वचित्त्यां योनामिसु

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ३९ भौमं दिव्यं मानुषं च
महित्वं कर्मयोगजं यस्त्वेको निरयो पन्थ्यं पुरुषानुजनप्रियः ४० इति भागवते पंचमस्कंधे प्रथमोध्यायः १
१ शुक उवाच एवं पितरि संप्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजाः औरसवद्धर्मावेक्ष
माणः पर्यगोपायत १ स च कदाचित् पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां प
तिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयांबभूव २ तदुपलभ्य भगवानादिपुरुषः सदसि
गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामा
स ३ ॥

ख्यानजीजनत अस्मिंस्त्वं प्रोषसिद्धोयमाग्नीध्रः स्वेनाग्रजः विरमन्निवृत्तस्येदं चरितं मुनिरब्रवीत् १ जंबूद्वीपमोकोया
सांताः प्रजा औरसवत्पालयामास धर्मावेक्षमाण इत्यर्थः १ पितृलोककामः पुत्रकामः सुरवराणां वनिताः तासामाक्रीडा
चलो मंदरः तस्य द्रोण्यामाभृतानि संपादितानि परिचर्योपकरणानि पुष्पादीनि येन २ तदुपलभ्य ज्ञात्वा ब्रह्मा अभि
यापयामास प्रस्थापयामास ३

श्रीः
भा. पं.
टी.
६

तावत्तदाश्रमोपवनमुपबभ्रामेत्यन्वयः रमणीयत्वमेवाह विविधाश्च निविडाश्च ये विटपिनः तेषां ये विटपाः ते-
षां निकराः तैः संश्लिष्टाः पुरटलताः स्वर्णवल्ल्यः तास्वारूढाः स्थलविहंगमा मयूरादयः तेषां मिथुनैः प्रोच्यमाना-
भिः श्रुतिभिरुच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयः तैर्विचित्रं यथा तथा उपकूजिताना-
दिता अमलजलाशयाः तेषु कमलाः तेषामाकरमुपवने ४ सुललितेन गमने ये पदविन्यासाः तैर्गतौ वि-

तावत्तदाश्रमोपवनमतिरमणीयं विविधनिविडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थल-
विहंगमिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्वि-
चित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ४ तस्याः सुललितगमनपदविन्यास-
गतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः
समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ५ तामेवाविदूरे म-
धुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोक-
सुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं ६ ॥

लासो यस्याः चकारात्तस्याश्चेत्येकवाक्यतायां खणखणेति ध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनेनामीलि-
तेन ध्यानेन पद्मनलिनमुकुलेन यो युगलमीषत् विकचय्य किंचिदुन्मील्य व्यचष्ट ददर्श तामेव देवीं मकरध्वजस्य
वशमुपनीतः सन् जडवदिति ह्वयमानान् दृष्टा श्लोकान्ववाच नाम्नानुकरणं च वेदध्योनतदर्शीकार्थं
दिविजातो देवानां मनुष्याणां च यानि मनांसि नयनानि च तेषामाह्लाददुघैर्गमनस्यादिभिर्नृणां मनसि कामस्य विवरं
प्रवेशद्वारं विदधतीं गतिश्च विहारश्च क्रीडा विनयश्च कोऽवलोकश्च सुस्वराक्षराणि च अवयवाश्च तेषामाह्लादयैस्तैः ६
६

निजमुखाद्विगलितममृतमिव स्वादुस्त्रामवमादकं वयस्यस्त्रासंभाषणं तस्मिन्नामोदो निःश्वासगंधः तेन मदांधायमधुकर
निकराः तैरुपरोधः आवरणं तेन भयाद्रुतः प्रोत्प्लेयः पदन्यासः तेन वल्गुस्पंदनं किंचिच्चलनं स्तनयोः कवरभारे वशानाया
वयस्याः तांनस्याश्रवलोकनेन निहृतावसरस्य दत्तावकाशस्य ६ कावेशैलगिशवस्मिन् किंचकीर्षसि मुनवर्यैन्याहि
प्रसत्वेनमभोधनादिलाघानुकरणार्थं हेमुनिवर्य नूनं भगवतः परदेवता भूतस्य मायासि भुवावालद्व्यस्त्राह हेमुन्मवेवि

२

निजमुखविगलितामृतामवसहासभाषणामोदमदांधमधुकरनिकरोपरोधनद्रुतपदविन्यासेन वल्गुसं
दनस्तनकलशाकवमभारवशानां देवी तदवलोकनेन विहृतावसरस्य भगवतो मकरध्वजस्य वशानुपनी
तोजडवदिति होवाच ६ कात्वं चिकीर्षसि च किं मुनिवर्य शैलेमायासि काऽपि भगवत्परदेवतायाः विज्ञेवि
भर्षि धनुर्षी सुहृदात्मनोर्यैः किंवा मृगान्मृगयसे विपिने प्रमत्तान् ७ वाणाविमौ भगवतः शतपत्रनेत्रो शा
ताव पुंखरुचिरौ अतिति निम्नदंतौ कस्मै युयुंत्स इव नेविवरन्नविभ्रमः ते मायने नोऽपयांत विक्रमोस्तु

॥ ८ ॥

ज्ञेतनिर्गुणोऽपि धनुर्षी विभर्षि किमात्मनोर्येतवेताभ्यां किं कार्यमस्ति किं वा प्रमत्तान् अजितेंद्रियान् मृगतल्यानस्मदा
दीन् मृगयसे तान् वशीवर्तुं धनुर्षी धारयसीत्यर्थः ७ करासावालद्व्याह वाणाविमौ शातपत्रेनेत्रे कमलेते एव पत्रा
णि पिच्छानि ययोः शातौ विभ्रमेणाम ग्रथौ पुंखाभ्यां विनापि रुचिरौ पत्रलताकल्पितनेत्राभ्यां परभागस्य पुंखस्यानी
घस्याभावात् अतितिम्मौ तीक्ष्णौ दंतौ अग्रभागौ ययोः तौ कस्मै प्रयोक्तुमिच्छसीति नविभ्रमः अतो भयादेतावता
मार्गयामहे तवायं विक्रमोऽस्माकं ते मायास्तु ८

श्री:
भा॰ पं॰
टी॰
७

तदंगपरिमललोभेनानुगच्छतो भ्रमरानालक्ष्याह शिष्या इति प्रजल्पंतं मम ते गुच्छा वृषीवाचो नो विलुलिता विगलिताः
भ्रमन्सामाभितो हृष्टीगलितानि कुसुमानि भजंतीत्यर्थः श्रुत्वेवेनोपमावेदयन्गुच्छा इवेति ५ नूपुरस्वनमाकर्ण्याह वा
वामिति त्वं भूतनवबक्ष्यापंजरयोः नूपुरयोस्तित्तिरीणां श्रेनगंतमत्वानापरे केवलेवावेक्ष्य द्रुमः कथं भूतामन्नूपोयहष्टव
रूकोंस्तुवंतां प्रतिपकरेतां वपीतंपरिधानवस्त्रेनितेवकांतित्वेनप्रकल्प्याह कदंबकुसुममध्यरुचिदीप्तिः श्वेकवि॰

शिष्याः प्रेमभगवतः पतिताः पठंति गायंति सामसरहस्यमजस्त्रमीशा गुच्छच्छिवा विलुलिताः भ्रमतो
हृष्टीः सर्वैभजंत्यच्छिगणाइवबक्षपागावाः ५ वावेपरेवरणापंजरतित्तिरीणांब्रह्मत्रनूपमुवगंस्फूर्ण
वामत्वंम्य लज्जाकदंबकरुचिरंगविरहकबिंबेयस्यामलानपरिधिः क्वचवल्कलंते ६ किंसेभूतंरुचिर
योर्द्विजस्तंगयोस्तेमध्येकुशोवहसियद्वहृशिः स्थितामे पंकोरुणःस्वरभिरात्मविषाणाईहकयेनाश्रमे
स्तभगामेस्वरभीकरोमि ॥ ॥

ह्रेक विवेनितेबस्यसुंदरमंडलेक्कलज्जा पाठांतरे श्रृंगेतिसंबोधनेमेवल्लामालक्ष्याह यस्यामलानंपरिधिः प्रवर्त
ते वल्कलानितेवकांतित्वेनप्रकल्प्यवस्त्रमहष्टैवश्वत्ति क्वचवनेवल्कलमिति ६ स्तनावालक्ष्याह स्तनयोः श्रृंगयोः
किंसेभूतंकिंसंधर्णामस्ति मनोहरेकिंचित्सीत्येनावनजानामियतोमध्येकुशोपिवहसि यच्चमेहृशिः
हृष्टिः स्थितामेलग्नास्ति अन्यथेदंहृदयेनचटेतइतिभावः स्तनगतंउरुममालक्ष्याह पंकोरुणःस्वात्मनस्तवविषा
णोस्तनेईहक अन्यसर्वःऊनइत्यतआह येनपंकेन ॥

लोकेस्यानंयत्रत्योऽनउरसाश्रस्यमहर्वाविवक्षौविभर्तिमवसउन्नयनोद्गोभको भागंतरेश्वस्यभूतलच्चरोतृतीया वक्रे
ववहृद्भुतेविभर्तिकिंलदाह रसोमधुरालापः रामोविलासः ताभ्यांसहितास्तथाग्रधराभूतेप्रादिशङ्खान्तस्मिनर्मादि
॥ कावानवलोकेग्रात्मनोदेहस्यवृत्तिग्राहारः भृंगहेसवे ग्रदनान्वचर्वणान्तहाविविति तस्मैवयोगंथोवातिग्रागा
च्छतिरतितावलाभिप्रायं ग्रदनान्वहिरंगभातीतिपाठे ममतावज्ञोजनाद्वहिर्भूतेवद्वत्तिभातीत्यर्थः यतस्त्वंविलोः
कलासिविसुस्त्रनाश्राति ग्रत्रमन्नन्योग्रभिचाकाशीतीतिस्फुतेः विलोःकलासीत्यत्रहेतुः तवकर्णौविलासरिवा

लोकेप्रदर्शयस्वहृत्तममतावकंमेयत्रत्यश्त्यसुरसावयवावक्षौ ग्रात्महितस्यमनउन्नयनौविभर्तिविहङ्ग
तेसररमगासमुदादिवक्रे ए कावात्मवृत्तिरदनाद्बविरंगवातिविलोःकलास्यनिमिषोन्मकरौवकर्णौ उदिम्न
मीनयुगलेद्विजपंक्तिशोभाविरामसन्नभृंगनिकरस्मरहुन्सुखेते ए यामोवयाकरसरोजहतः पतंगोदित्त्वभ्रमत
भ्रमतयजयतेद्विणोम सुकंनतेस्मरसिवक्रजटावत्रथकेशेतिलोहरतिलपदपवनीवीम् १५

निमिषोन्मकरौभ्रुतिमिषोरत्नेरवेननिमेषग्रन्योउल्लसतौमकरौमकराकारेकुंडलेययोः तौकिंवततवस्त्वेसररश्च
मरउवतदेवाह उदितेवेवलेमीनयुगलमिवनेत्रद्वयंयस्मिन् द्विजाःदन्ताःतेषांपंक्त्याशोभाविःशोभावस्मिन् सवाक्षि
द्विजाब्रुवकेशास्त्रोमः परिमललनभ्रमृंगस्तोमोवायस्मिन् ए पतंगाःकुडकाःभ्रमतः भ्रमाविलसस्यमेग्रादिणीपजय
तेवंवल्लतोनयति वक्रकेशामस्वहंसतत्वंबधनेनस्मरसिनतेभावयसिकिं कष्टोभूर्तोनीवीहरति पतत्त्वनस्मरसिकिं
१५ राम

उपलब्धेशास्त्रेमत्वंममामित्रमयासहनपःचतुमर्हसि किंचतवैभवभावनःसेस्यतिविस्तारकोब्रह्मामेप्रसीदति वोभार्या
कल्पयतीत्यर्थः १५ द्विजदेवेनब्राह्मणादत्तेहृकमनश्चलयंसतमापयाति हेवारुस्त्रैगियतत्स्तेविविनतयमोवस्थीनेने
तुमर्हसि सविव्यसत्सख्योपिशिवाश्चतृकुलाःसत्यःमाप्रतिसवंतश्चनुवर्ततोयद्वा पत्तावनुर्येतमेयोः सविव्यः स

रूपंतपोयनतपश्चरतोतपोद्धेतेनत्केननपसाभवतोपलब्धे कर्तेनपोर्हसिमयामहमित्रमत्तेकिंवाप्रसी
दतिसवैभवभावनोमे १५ नवात्यजामिद्यितेद्विजदेवदत्तेयस्मिन्मनोहृगपिनवियातिलग्नं मोचारुसृंग्य
र्हसिनेत्वमनुव्रतेतेविवेयतःप्रतिसवंतशिवाःसविव्यः १६ शुकोवाच इतिलालनानुनयातिविशारदोग्रा
म्यवैदग्ध्यापरिभाषयातांविवुधवरांविबुधमतिमभाजयामास १७ सावनतस्तस्यवीरयूथपतेर्बुद्धिशी
लरूपवयः श्रियोदार्येणपराक्षिप्तमनास्तेनसहायुतपरिवत्सरोपलक्षणंकालंजंबुद्वीपपतिनाभौमस्व
र्गभोगान्बुभुजे १८ तस्यामुहवाआग्नीध्रात्मजान्नवराजवरआग्नीध्रोनाभिकिंपुरुषहरिवर्षइलावृतरम्यकहिर
ण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नवपुत्रानजनयत् १९ सासूत्वाथसुतान्नवानुवत्सरेगृहएवापहायपूर्व
चित्तिर्भूयएवाजंदेवमुपत
स्थे २०॥

ल्पः शिवाः फेरवः सृगाल्यः ताः प्रतिसवंतनिर्यान्ति यद्वावनवासेसहचर्योहिरण्यः शिवाः प्रतिसंवंतमदाप्तिगच्छं
त १९ ग्रामेषुवैदग्ध्यंयस्याःबुद्ध्यादीनांहेहैकं जंबुद्वीपपतिनाआग्नीध्रेणासहसाप्तवंवित्ति सवाधसयउपतस्थेप
भजत २० ॥

ौत्पत्तिकेनैव स्वभावेनासंहननेऽंगवत्त्वं २१ कामानां भोगेः अधिमधिकं मन्यमानः श्रुतिभिर्विहितैः कर्मभिः अवारुं
ध प्राप मादयंते मोदंते २२ इति एवं श्रुताः संज्ञा यासां ताः परिणीतवंतः २३ इति श्रीभावार्थदीपिकायां पंचमस्कंधे द्विती
योध्यायः २ तृतीये च विनिनाभेः परमं गलमीर्यते यस्य यज्ञे प्रतीतः सन्तुष्टोऽभूदृषभो हरिः नाभिराग्नीध्रसुतः अप

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ताः आत्मतुल्यनामानि यथा
भागं जंबूद्वीपवर्षाणि बुभुजुः २१ आग्नीध्रो राजातृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्त
स्याः सलोकतां श्रुतिभिरवारुंधत यत्र पितरो मादयंते २२ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदुहितॄर्मे
रुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् २३ इति श्रीभागव
ते पंचमस्कंधे द्वितीयोध्यायः २ शुक उवाच नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमव
हितात्मायजत १ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु कर्मसु द्रव्यदेशकालमंत्रर्त्विग्दक्षि
णाविधानयोगोपपत्त्या दुरधिगमोपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजन
नाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्चकार २ ॥

प्रजया मेरुदेव्या भार्यया सह १ प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सम्यग्योगाः उपायाः तेषामुपपत्त्या संपत्त्या
दुरधिगमोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन्नात्मानमाविश्चकार अपराजितमव्यक्तं निजभ
क्तानां ये अभिप्रेता अर्थाः तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य हृदयंगमं सात्त्विकं यतो मनोनयनान्यानंदयंति ये
अवयवास्तैरभिरामं सुंदरं २ ॥

अथ हेत्वादिनिपातनबाहुल्यं वाक्यालंकाराय आविष्कृतं भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं येन तेनोमयं पुरुषं तु विशि
ष्यते इति तथा पुरुषोत्तममभिन्नमर्थः अर्हणेनार्च्चनेन मङ्गलोपनस्य अभजन्निन्यन्वयः विलसन् श्रीवत्सप्रवललामं चिह्नं
यस्य दरवरः शंखः वनरुहं पद्मं अङ्घ्रिचक्रं अमृतमणिः कौस्तुभः एवमादिभिः उपलालिते ३ स्फुरत्किरणान्यप्रव
रामणायः तन्मयानि मुकुटादीनि अंगानां भूषणानि तैर्विभूषिते वर्द्धमाने दृष्टाने: अथ नाथेत्योत्तम अथ नेति अर्थं ४ अर्हसी

अथ हृतमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयांबरधरमुरसि विलसन् श्रीवत्स
ललामं दरवरवनरुहवनमालाद्युर्ध्वमृतमणिगदादिभिरुपलालिते २ स्फुरत्किरणप्रवाममणिमयमुकु
टकुण्डलकटककटिसूत्रहाराकृत्येवं नूपुरादीनंगभूषणभूषणान्यूर्मिकादस्य शुभ्रं यथा पनाथेत्योत्तमथनमुपल
भ्य सवृष्टमाणमर्हणेनार्च्चनेन तपोधनेनोपनस्थुः ४ अर्हसि शुश्रूषं हे नृमा हेणमस्माकं मनुष्याणां नमो
नमः इत्येतावन्मात्रयाचितं कोऽर्हति प्रमास्वकृतेगणव्यतिकरमतिरनीशा ईश्वरस्यपरस्य प्रकृतिपुरुषयो
रवेकनाभिर्नामरूपाकृतिभिरूप

निरूपण ५

त्यादिनालिंगादेनस्तवंवेति हेपुर्हंतम पटिप णोपि विश्वजनपदानां भूतानामस्माकमर्हणं अक्रूरः स्वयमेव स्वीकर्तुमर्हसि १
ननु वयं स्तोतुमशक्ता इत्याह: नमोनमः इत्येतदात्मकं सत्परूपं शिक्षितं तत्त्वरूपस्य दुर्ज्ञेयत्वात् २ तदेवाह: कोर्हतीति
प्रकृतिगुणानां व्यतिकरः प्रपंचः तस्मिन्नेवाससतिर्यस्य अनपवानीशाः प्रकृतिपुरुषयोः परस्य अतएवेश्वरस्य अर्वाक्तिना
मिः वाममसृष्टशांतीभिः प्रपंचानगतानिभिः नामवन्नपंच आकृतिश्च आकारः ताभिश्च स्वरूपनिरूपणं कर्तुं कोनाप्रमानर्ह
ति ५ ॥ ५ ॥

मर्हेत्तन्मात्रमेवार्हति नाधिकमित्याह सकलजननिकायस्य वृजिनं निरस्यतीति तथा शिवतमाः प्रवराश्च ये गुणाः तेषा
मेकदेशः तस्य कथनाद्विना अधिकेनार्हति ६ वाङ्मनसोर्गोचरोपि त्वं भक्तानां सुखाराध्य एवेत्याहुः हे परम परिजनैर
नुरागेणाविरचिताः शबलसंशब्दा गद्गदान्तरस्तवः सलिलं वासितं किसलयाश्चाङ्कुरपल्लवाः शिलेति पाठे शिलेऽङ्कुरा
ग्रादिमंजरी एवमादिभिः संभृतया संपादितया पूजया परितुष्यसि ७ अथेति प्रकारान्तरेणान्यथा तु अनया इज्यया या

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ६ परिजनानुरागविरचितश
बलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ७ अथानु
यापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ८ आत्मन एवानुसवनमंजसाबोभूयमाना
शेषपुरुषार्थस्वरूपस्य किंतु नाथाशिष आशासानानामेतदभिराधनमात्रं भवितुमर्हति ९ ॐ नमो नमः

हनुमानाय लक्ष्मणाग्रजाय

वातायनमो

नमः

येनापि उरुभारभरया अनेकाङ्गसंभृतयापि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः ८ अत्र हेतुः आत्मनः स्व
त एवानुसवनं सर्वदा अञ्जसा साक्षात् बोभूयमाना अतिशयेन भवन्तो ये शेषाः पुरुषार्थाः तेषां स्वरूपं यस्य परमानंदस्य तवैव
सत्यपि यागानर्थमित्याह किंत्विति सकामानाम
स्माकमेवैतदुपाद्यते न तवेत्यर्थः ९ ॥ ९

श्रीः भा·पं· टी· ७

स्वोपयोगमेव प्रदर्शयंति नयथेति परमेभ्योपि परमपुरुष प्रकर्षयुक्तया करुणया उपकल्पयिष्यन् वरान्कामि
तेचनापचितः अनपचितमप्रजितमप्यजामपेक्षमान स्वयमेवोपलक्षितः इहास्मिन्नरवत् सापेक्षवत् १० यद्यपि
वरान्दातुमाविर्भूतोसि तथापि हे अर्हत्तम राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणामस्माकमीक्षणविषयो भवान्
यर्हि यदा आसीत्तदायमेव वरः सजातः ॥ दर्शनस्य दुर्लभत्वमाहुः असंगेन वैराग्येन निशितेन यज्ज्ञानं स एवानलः

न यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमु
पकल्पयिष्यन् स्वयं नापचित एवेतरवदिह्योपलक्षितः १० अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षे
र्वरदर्षभो भगवान्निजपुरुषेक्षणविषय आसीत् ॥ असंगनिशितज्ञानानलविधूताशेषमलानां भव
त्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोसि
१२ अथ कथंचित्स्खलनक्षुत्पतनजृम्भणदुःरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशाया
मपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवंतु १२

तेन विधुता अशेषमला येषां अतो भवत एव स्वभावो येषां तानेवाह आत्मारामाणामेवंभूतानां मुनीनामपि परममंग
लायने गुणगणकथनमेव न तद्दर्शनं यस्य अनस्तैरनवरतं परिगुणिता अभ्यस्ता गुणगणा यस्येति संबोधनं १२ द
र्शनेनैव कृतार्था अपि परमेकं प्रार्थयंते अथेति स्मरणाय विवशानां
नोस्मत्तमस्माकानांनः १३ ॥ राम

१०

अन्यच्च प्रार्थनीयमस्तीत्याहुः किं वेति आशिषामीश्वरं स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति प्रजायामेव पुरुषार्थप्रतिप्रत्ययो यस्य अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति १४ इदं च नातिचित्रमित्याहुः क इहे त्यादि ते अपराजितया मायया अनवसितपदव्या अनलक्षितमार्गया अपराजितः को वा न कोपि अत एव तया अनावृतमतिः कः अत एव विषयविषरयेन स्वयया वेगः तेनानावृता प्रकृतिर्यस्य सः कः अनुपासितमहच्चरणाः अतः त्वन्मायामोहितस्यैवमाशंसा युक्तेद् इत्यर्थः १५ अदभ्रकर्तः हे बहुकार्यकारिन् अल्पीयसि कार्ये यद्यस्मादिह समाहूतोसि तत्र अर्थधियां मंदानां

किं चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणं १४ को वा इह ते ऽपराजितो ऽपराजितया माययानवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः १५ यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मंदानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान्प्रतिबोढुमविदुषां १६ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह १७ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलं १८

तेषां नो यद्देवहेलनं अवज्ञानं तत् सर्वान्प्रति त्वं साम्येन सहेत्वा प्रतिबोढुमर्हसि १६ इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिः तेनाभिवादिताः ये ऋत्विजः तैरभिवंदितौ चरणौ यस्य १७ इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षः १८ असुलभत्वे हेतुः ममाहमेवाभिरूपः सदृशः कैवल्यात् अद्वितीयत्वात् द्विजेषु देवाः ब्राह्मणाः तेषां कुलम् १८

श्री॰
भा॰ पं॰
टी॰
११

ष्याग्नीध्रेयेनाप्तौ ॥१९ पतिं नाभिं हे विष्णुदत्त तस्यावरोधायने अन्तःपुरे मेरुदेव्यां शुक्लया शुद्धसत्त्वमय्या तन्वावततार केषांधर्मा
न् वातरशनानां दिग्वाससां पाषण्डिनामाम्नायधर्मान् श्रमणानां तपस्विनां ऋषीणां ज्ञानिनां ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचा
रिणां २० इति श्रीभावार्थदीपिकायां पंचमस्कंधे तृतीयोऽध्यायः ३ ततश्चादिति भिः श्लोकैः ऋषभस्योद्भवे महत्त्वं लो
कावर्ण्येन तत्कर्म नैष्कर्म्यं च निदर्शितं १ ततश्चैशतपुत्रस्य राज्येन तस्योपवर्ण्यते यस्य राज्येन नः सर्वे संतोषात्सूतनिर्वृ

तेन प्राग्नीध्रीयेंशकलया व्रतविद्यामि प्रात्मतत्त्वमनुपलभमानः १९ इति निशामयंत्या मेरुदेव्याः पति
मभिधायांतर्दधे भगवान् बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया
तदवरोधायने मेरुदेव्यां धर्मान्दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तन्वा
ववतार २० श्री इति भागवते पंचमस्कंधे तृतीयोऽध्यायः ३ शुक उवाच अथ ह तमुत्पत्त्यैवाभिव्यज्य
मानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्रा
ह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः १ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौ
जसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार २

तेः २ अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्राङ्कुशादीनि यस्य महाविभूतिः सर्वसंपत्तिः साम्यादि
भिः समं वर्धमानः प्रभावः प्रकृतयो मात्यादयः जगृधुः अभिकांक्षितिस्म १ वर्ष्मणा देहेन तस्य विशेषणानि वरी
यसा श्रेष्ठतमेन बृहन्तः श्लोकाः पद्यानि कवीनां यस्मिन् तेन ओजस्तेजः वीर्यं प्रभावः शौर्यमुत्साहः एतैर्गुणैः श्रेष्ठ
त्वात् ऋषभः श्रेष्ठ इति नाम चकार २ ॥

तस्य वर्षे मंडले ३ अवरुध्य प्राप्य स्वैरं इच्छया गृहीतो नरलोकसमानधर्मो मनुष्याकारो येन तं अतएव मायया स्वपुत्रत्वेन विलसिता मतिर्यस्य ४ आपौरप्रकृति पौरान् प्रकृतीश्चाभिव्याप्य विदितोऽनुरागो यस्मिन् कथंभूतो नाभिः जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः आत्मजं धर्ममर्यादारक्षार्थमभिषिच्य ब्राह्मणानामनुसंधाने निधाय विशालायां बदरिकाश्रमे

तस्येंद्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवान् ऋषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ३ नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकधर्मं भगवंतं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः ४ विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवंतं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ५ यस्य ह पांडवेय श्लोकावुदाहरंति को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत् पुमान् अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ६ ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मंगलपूजिताः यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ७ अथ ह भगवान् ऋषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन् आत्मजानामात्मसमानानां शतं जनयामास ८

प्रसन्नं प्रवानुद्वेगं एकं निपुणं च तीव्रं तेन उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ५ नाभेः प्रसिद्धं कर्म श्रुत्वा तत्कोनुस्पर्धया नाचरेत् न कोपीत्यर्थः ६ मंगलैः दक्षिणाभिः पूजिताः संतः ओजसा मंत्रबलेन ७ अन्येषामनुग्रहाय प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणः अनुशिक्षयन् उभयविधं श्रौतस्मार्तलक्षणं कर्म विधिं अभियुंजन् अनुतिष्ठन् च वंशाभावाय आत्मजानां शतं जनयामास ८ ॥

श्री: भा० पं० टी० १२

नैभरतमनुऋषभवर्त्तादयो नवपुत्रा नवतेः प्रधाना ज्येष्ठाः १० तदनन्तरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः वसुदेव
नारदयोः संवादो यस्मिन् उपरिष्टात् एकादशे ११ महाशालीना अतिविनीताः १२ केवलः शुद्धः विपरीतवत् अन्नोप्व
दवत्कर्माणि कुर्वन् न्ययमयत् नियमितवान् पाठांतरे नितरामरमयत् कर्मकरणेहेतुः अनुगतम् उत्सन्नधर्मस्वयमा

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति ९ तमनु कुशावर्त
इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवति प्रधानाः १० कविर्हविरन्तरि
क्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजन इति भागवतधर्मदर्शना नव महाभागव
तास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ११ यवी
यांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः
१२ भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत् क
र्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशः
प्रजानन्दामृतावरोधेन गृहेषु लोकं नियमयत् १३ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः १४ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण
सामादिभिरुपायैर्जनतामनुशशास १५

चरणेनातद्विदामुपशिक्षयन् कथं धर्मादीनामवरोधेन संग्रहेणानंदो भोगस्तत्संमोदः १३ शीर्षण्यः श्रेष्ठः तेनाचा
रितं तत् १४ सकलो धर्मो यस्मिन् तत् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वैव करोतीत्यर्थः
१५ राम कृष्ण
राम

द्रव्यादिभिरुपचितैर्वेदविहितैर्यज्ञैर्विधिवत्तत्तद्वयोयोपोवनं स्तुवैव धर्ममाविश्चेदिति वचनात् विविधोद्देशाः नानादेवतोद्देशो यथोपदेशं यथाविधि १६ अन्यस्यात्मकाशादात्मनः कथंचिदपि किमपि कथंचनापि न वाञ्छति इच्छामुदये हष्टान्तः अविद्यमानं स्व पुष्पादिकमिव न चान्यदीयमवेक्षतेपीत्यर्थः भर्तरि ऋषभदेवे प्रतिक्षणमुल्लसितस्नेहोद्रेकं विनान्यन्न वाञ्छति १७ अ वहितमात्मनः मेयत्नचिन्तामपि प्रजानामनुशासनार्थमुपशिक्षयन्निति ह वक्ष्यमाणमुवाच १८ इति श्रीभावार्थदीपिका

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज १६ भगवत ऋषभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण १७ स क[illegible]दटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्निति होवाच १८ इति श्रीभागवते पंचमस्कन्धे चतुर्थोऽध्यायः ४ ऋषभ उवाच नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यमनन्तम् १ ॥

पंचमस्कन्धे चतुर्थोऽध्यायः ४ पंचमे मोक्षधर्मोपदेशैः प्रजानुशासनं उक्तं पारमहंस्यं चरतस्य देहत्यागादि तथा १ विड्भुजां श्वसूकरादीनामपि ये संति तान् कष्टान् दुःखदान् कामान् विषयान् नार्हति तेन यातनीयेन मनुष्यदेहेन भवति दिव्यं पुत्रका येन तपसा यस्मात् शुद्धात्सत्त्वादनन्तं ब्रह्मसौख्यं भवति १ ॥

श्रीः
भा॰ ५
टी॰
१३

मोक्षबंधयोर्निदानमाह महत्सेवामिति तमसः संसारस्य द्वारं योषितां ये संगिनस्ते महतां लक्षणमाह सार्धेन महा
न्त इति साधवः सदाचाराः २ मयि ईशे कृतं सौहृदमेव अर्थः पुरुषार्थो येषां वाशब्देनान्यनिरपेक्षत्वं सैवास्य लक्षणं वदर्शय
ति देहं बिभर्तीति देहंभरा विषयवार्तैव न यस्य विषया येषु तेषु जनेषु जायादियुक्तेषु च रातिर्मित्रं यथनं वा पाठो नेजाया
दियुक्तेषु यावदर्थाश्च यावत्यर्थमेव ये वार्था येषामिति मध्यमपदलोपी समासः देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः
साधवो ये २ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु गृहेषु जायात्मजरातिमत्सु न प्री
तियुक्ता यावदर्थाश्च लोके ३ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणो
ति न साधु मन्ये यत आत्मनोयमसन्नपि क्लेशद आस देहः ४ पराभवस्तावदबोधजातो यावन्न जिज्ञासत आ-
त्मतत्त्वं यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः ५ ॥ ॐ नमो
भगवते वासुदेवा
य ॥

३ कामान्नार्हतीति यद्युक्तं तत्र उपपादयति नूनमिति यद्यदा इंद्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन् विकर्म
पापं नूनं कुरुते यतो विकर्मणः प्राचीनाद्यं क्लेशदो देहो जातः तस्यैव पुनः करणं साधु न मन्ये ४ देहादेर्नश्वर
त्वात् क्रियानियमनर्थ इत्याशंक्याह पराभवो देहादिना स्वरूपाभिभवः अज्ञानकृतस्तावद्भवति तत्र हेतुः यावत्
क्रियाः स्युः तावदिदं मनो हि कर्मस्वभावमेव स्यात् येन कर्मात्मकेन मनसा ५

१३

उक्तमुपसंहरति एवं सर्वं कृतं कर्म कर्तृभूतं मनः कर्मभूतं वशं युङ्क्ते पुनः कर्मनिष्ठं करोतीति जीवन्मुक्तः कर्म व्याप्नोतीत्यर्थमाह अवि
द्यया आत्मनि उपधीयमाने आच्छाद्यमाने सति एवं मनः कर्तृ पुरुषं कर्मवशं प्रयुङ्क्ते ६ न केवलं देहयोगमात्रमनर्थो नरकेऽप्याह
यदा गुणानामिन्द्रियाणामीहां चेष्टाम् अयथा मिथ्या आत्मीया न भवतीति विपश्चित् विवेकी सन् न पश्यति न पश्यतीति यावत्
अयथा आत्मीयत्वेनेत्यर्थः ततस्तदा सहसा गतस्मृतिः स्वार्थप्रमत्तः सन् अज्ञः सन् मैथुनसुखप्रधानं गृहमाश्रमं तापा
न् विंदति ७ ननु यथा पश्वादयोः स्त्रिया मिथुनीभावस्य मोहत्वेऽनुभवतः कुतः तापाः अतः तत्राह पुंस इति प्रत्येकं तयोरेकैको

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ६
यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगार
मज्ञः ७ पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहो
ऽयमहं ममेति ८ यदा मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ आश्लथेत तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं
यात्यतिहाय हेतुम् ९ ॥ ॥

हृदयग्रंथिमेवाह एवं मिथः स्थूलं मनं हृदययोर्ग्रंथिरभेदं वदंतीत्यर्थः तत आह अत अस्मान्मिथुनीभावात् प्रत्येकं हृद
यग्रंथिरसौ वर्तनात् देहेंद्रियमात्रोऽहं ममेति मोहः अस्मात् गृहादिभिर्विषयभूतैर्महामोहो भवेदित्यर्थः ८ कदा तर्हि तस्य
स्य निवृत्तिरत आह यदा अस्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथि
लो भवेत् तदा अस्मान्मिथुनीभावान्निवर्तते
ततश्च हेतुमहंकारं त्यक्त्वा मुक्तः सन् परं
पदं याति ९ ॥

श्री: भा. पं टी: १४

ह्येवमनिरूप्येवोक्तं तत्र पंचविंशतिसाधनान्याह चतुर्भिः ह्रेमेमय्यि गुरौ भक्तिः सेवा अनुवृत्तिःस्मरता विगतत्रस्यास
वैरलोकांतरेपिव्यमनानुवृत्तः स्वोनुसंधानेनइहानिवृत्त्याकामकर्मत्यागेन १० मदर्थैः कर्मभिःअहमेवदेवोयेषांतैः संगात्
ह्येषुना:देहगेहयोरात्मबुद्धेः अहंममेतिबुद्धे ११ अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेनसध्यक सम्यक्इतिसर्वत्रसेवं

ह्रेमेगुणोमय्यिभक्त्यानुवृत्त्या वित्तस्पृहाहेहृतिलिलयाव सर्वत्रज्ञेनोर्ध्वमनावमत्याजिज्ञासयानुपसेहानि
वृत्त्या १० मत्कर्मभिर्मत्कथयाचनित्यमहेवसंगाद्गुणकीर्तनान्मे निर्वैरसाम्योपशमेनवृयाजिज्ञासया
देहगेहात्मबुद्धेः ११ अध्यात्मयोगेनविविक्तसेवयाप्राणेंद्रियात्माभिजयेनसध्यक सच्छ्रद्धयाब्रह्मच
येणाचाश्वदसंप्रमादेनयमेनवाचां १२ सर्वत्रमद्भावविचक्षणेनज्ञानेनविज्ञानविराजितेन योगेनधृत्यु
द्यमसत्वयुक्तोलिंगंव्यपोहत्कुशलोहमाख्यं १३ कर्माशयंहृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः
अनेनयोगेनयथोपदेशंसम्यग्व्यपोह्योपरमेतयोगा
त १४ ॥

थः अमंप्रमादेनकर्तव्यस्यापरित्यागेन १२ सर्वत्रमद्भावोमद्भावनातत्रविचक्षणेननिपुणेनविज्ञानविराजितेनअनु
भवपर्यंतेनज्ञानेनयोगेनसमाधिना धृत्युद्यमसत्वयुक्तः धैर्यप्रयत्नविवेकैः युक्तः सन् अहंकाराख्यमुपाधिंव्यपोह्य
त निरस्येत १३ ततः साधनादुपरमेदित्याह कर्माण्याशेरतेयस्मिन्
योगेनउपायेनयद्यपिसाधनोपरमः सिद्धएवतथापियावद्देह
पातेनदभ्यासंशंकावारणायाक्तम् १४ ॥ १४

१४

किं वा उत्तानपि नाशिष्यान्वा गुरुः नृपश्च प्रजा एवमनुशिक्षयेत् मल्लोकं यः कामयते यश्च मदनुग्रहरूप एवार्थो यस्य विमन्युः
शिष्टिलयाकरणे कोपशून्यः अतत्त्वज्ञान् नष्टमविद्वुषः श्रेयो बुद्ध्या कर्मसु मूढान् १५ न योजयेदित्यनेन द्वेषं पातयन्ति लो
कः स्वैर्विधिभिः नष्टदृष्टेर्हेतुः यदृतिनिकामं अतिशयेन कामो यस्य १६ तमीदृशं कुबुद्धिं दृष्ट्वा न वैद्यकः तं प्रवर्तयेत् न
कोऽपि उत्पथेन गच्छन्तमन्धं यथा नेनैव गच्छेति कः ब्रूयात् १७ समुपेतः संप्राप्तो मृत्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन

पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु
कर्ममूढान् १५ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः अन्योन्यवैरः सुखलेशहे
तोरनन्तदुःखं च न वेद मूढः १६ यस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानं दृष्ट्वा पुनस्तं सघृणः कु
बुद्धिं प्रयोजयेदुत्पथगं यथान्धं १७ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् दैवं न
तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युं १८ इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः पृष्ठे
कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः

॥ १९ ॥

यो न मोचयेत् स गुर्वादिर्न भवतीत्यर्थः यद्वा यस्तं मोचयितुं न शक्नुयात् अतस्तस्य गुर्वादि न स्यादिति निषेधः तत-
श्च पिता न स्यादिति उतोऽसन्तो यत्नो न कार्य इत्यर्थः दैवं देवता न स्यादिति इज्या न ग्राह्येत्यर्थः एवमन्यदपि द्रष्टव्यं १८ एवं मा-
न धर्मानुपदिश्य आत्मनश्च ऋषभत्वलक्षणधर्मोत्कर्षादि निरूपयते पांजन्मकथनपूर्वकं मा हृदाभ्यां इदं मन्त्रद्याकारं मम
दुर्विभाव्यमवितर्क्यं मदिच्छाविलसितं न तु कर्मप्राप्तो मनुष्य इत्यर्थः मे हृदयं तत्त्वं शुद्धं हृदयं यत्र धर्मः तान्शुद्धे-
सत्त्वमित्यर्थः अतः यस्मान्मया अधर्मो दूरादेव पृष्ठे कृतः उत्सृष्टः अत एव मामृषभं श्रेष्ठं प्राहुः १९

श्री॰ भा॰ पं॰ टी॰

भगवंतनस्तु हृदयेन सृष्टमन्नमयेन जाताः तस्मात्मत्संहितामहत्तमं मे सुनाभं मोदरं भजध्वं ननु त्वत्सुतत्वात् त्वं वयं भजनपुत्रश्चा त्वजाश्च पालयामेति वेदन्नत्राह तदेव मे शुश्रूषणं प्रजानां च पालनं भारतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः २० इदानीं ब्राह्मणांश्च मे त्याज्यत्वाशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह पंचभिः भूतेषु चेतनाचेतनेषु विरोहंतीति वीरुधः स्थावराः इत्युद्भेः प्रतिशयेनोत्तमाः तेभ्योपि ये सरीसृपाः सर्पंतीति जंगमाः तेषु उत्तमा इति सर्वं यानुषंगः तेष्वपि सबोधा निष्ठा स्थिति येषां पश्वादीनां तेकरादिभ्यः तेतः तेष्वपि मनुष्याः ततोपि प्रमथाः भूतप्रेतादयः ततोपि गंधर्वाः ततः सिद्धाः ततोन्ये विबुधानु-

तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभं अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजा नां २० भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ततो मनुष्याः प्रमथास्ततोपि गंधर्वसिद्धा विबुधानुगा ये २१ देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषां भवः परः सोथ विरिंच- वीर्यः स मत्परोहं द्विजदेवदेवः २२ न ब्राह्मणैस्तुलये भूतमन्यत् पश्यामि विप्राः किमतः परं तु यस्मिन्नृ भिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे २३

गाः किन्नरादयः २१ तेभ्योसुराः देवासुरेभ्यः संधिरार्षः देवाश्च मघवत्प्रधानाः देवेभ्यः इंद्रः श्रेष्ठ इत्यर्थः ततोपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः सन्भवः विरिंचो वीर्यं शक्तिः कारणं यस्य सः विरिंचवीर्यः भवस्तज्जनक त्वाद्विरिंचः ततः परः इत्यर्थः स विरिंचो मत्परः अहं परो यस्य द्विजदेवा ब्राह्मणा एव देवाः पूज्या यस्य सोहं २२ ब्राह्म- णैरन्यद्भूतं न तुलये समं न पश्यामि अतो ब्राह्मणात्परं तु भूतं किं पश्यामि न किंचित् विप्रा इति न यत्सानो ब्राह्मणा नो स बोधनेन मम स्वैवाभावादपि कंऊन स्यामित्यर्थः तत्र हेतु नाहं सार्द्धं त्यो यस्मिन्नु ब्राह्मणे हृद्रूपा प्रकर्षेणाहुतमश्नादिकामेय

१५

मेतत्त्वंनिर्वेदाख्योयेनब्रह्मणोनइहलोकेभूतायचब्राह्मणोसमादयोह्यष्टगुणाःसंतिततःपरंकिंपश्यामीत्यन्वयः २४ नि
स्पृहत्वमाह मत्तोपियेषांनकिंचित्प्रार्थनीयमस्तितेषांमित्रवैराराज्यादिनाकिमुत्स्यात्नकिमपि २५ तदेवंब्राह्मणस्यैतन्
विधायेदानींसर्वभूतसम्मानंविधत्ते हेसुताःसर्वाणिजंगमानिस्थावराणि चभूतानिमयधिष्ठानतयावोडुष्माभिःसंभज

धृतातनूरुशतीमेपुराणीयेनेहसत्त्वंपरमंपवित्रं शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र २४
मत्तोप्यनन्तात्परतःपरस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित् तेषांकिमुस्यादितरेणतेषामकिंचनानांमयिभ
क्तिभाजां २५ सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रुवाणि संभावितव्यानिपदेपदेवोविवि
क्तदृग्भिस्तदुहार्हणंमे २६ मनोवचोदृक्करणेहितस्यसाक्षात्कृतंमेपरिबर्हणं
हि विनापुमान्येनमहाविमोहात्कृतान्तपाशान्नविमो
क्तुमीशेत् २८ ॥

नीयानिपदेपदेक्षणेक्षणेविविक्तारागमत्सरादिरहितादृष्टिर्येषांतैः तदेवममार्हणं २६ सर्वकर्मणां ईश्वरार्पणंवि
धत्ते मनोवचोदृष्टीनामन्येषांचकरणानामीहितस्यव्यापारस्यमेपरिबर्हणमाराधनमेवसाक्षात्कृतंफलंयेनपरिबर्हणे
नविनाकालपाशाद्विमोक्तुंनईशेत्नसमर्थोभवेत् २७ ॥

स्वतनय एवमनुशिष्टितानपि लोकाननुशासनार्थमनुशासस्व मुनीनां पारमहंस्यधर्ममुपशिक्षयन् भवनमभिषिच्य राज्ये स्व
भइत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्प्रवव्राजेत्यन्वयः उर्वरितो विशिष्टः शरीरमात्रपरिग्रहो यस्य २८ अभि
भाष्यमाणोपि जनानां मध्ये जडान्धवद्वर्तमानः तूष्णीं बभूव स्ववधूतस्येव वेषो यस्य २९ नगरपुरादिषु पथे मार्गे मार्गे
प्रवनिचरापसदैर्दुर्जनैः तर्जनादिभिः परिभूयमानोपि तदविगणयन्नेवैकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः त
त्रपुरं पत्तनं ग्रामा गृहे ह वेतन्याकरः खनिः खेटः कृषीवलग्रामः वाटः पुष्पादिवाटिका शिबिरं सेनावासस्थानं व्रजो।

शुक उवाच एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भ
गवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानलक्षणं पारमहंस्यधर्ममु
पशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं
भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेशः आत्मन्यारोपिताहवनी
यो ब्रह्मावर्तात्प्रवव्राज २८ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोभिभाष्यमाणोपि जना
नां गृहीतमौनव्रतः तूष्णीं बभूव २९ तत्र तत्र पुरग्रामाकरखेटवाटशिबिरव्रजघोषसार्थगिरिवना
श्रमादिषु सार्थस्वनुपथमवनिचरापसदैः परिभूमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहन
ष्ठीवनग्रावशकृद्रजः प्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणोसद्
क्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः

गवां स्थानं घोषो गोपानां सार्थो यात्रिकजनसंघातः आश्रमा ऋषीणां तर्जनं भयजननं ताडनं प्रहारः मेहनं उपरि मूत्र॰
णं ष्ठीवनं श्लेष्मक्षेपः ग्रावा पाषाणः शकृद्रजः प्रक्षेपः पूतिवातो धोवायुः दुरुक्तं शापः एतैरगणने हेतुं ततः मक्षिका
भिरिवेति तत्रैव हेतुः असतीति मिथ्याभूते संस्थाने सन्निवेशो देहरूपे उपलक्षणे प्राकारो यस्य सदित्यपदेशमात्रं यस्य तस्मि
न्नभिमानवान् केन हेतुना उभयोः सदसतोरनुभावः तत्स्वरूपेण यत्स्वमहिम्नावस्थानं तेन अतएवाखण्डितं मनो यस्य

स वत्सग्रहगृहीत इवादृश्यत तत्र हेतुः पराक् पुरतो वलंबमानाश्च ते जटिलाश्च कपिलाश्च केशाः तेषां भूरिभारो यस्य स
अवधूतमनादृतं अत एव मलिनं निजशरीरं तेन कथंभूतोप्येवमदृश्यत अतिसुकुमाराणि करचरणोरःस्थलानि तथा
त्वं अगुणत्वं तदा हित्वं तदेव परमवरं च तस्य ७ ॥

कथमेकमेवविलक्षणयोः कारणमवस्थाभेदादित्याह गुणेति नैर्गुण्यं निर्गुणं ब्रह्मयोऽन्यकालेऽस्यन्वहष्टो
नेस्फुरयतियथेतिघृतनाद्यानुद्धेनतेयं स्वंपदं स्वक्तं भास्वरस्वरूपमहाभूतात्मकंवा अन्यत्र अन्यदा वृत्तीर्देशीय
तिएकादशवृत्तयश्राहएकादशेति आकृतयः क्रियाकाराः पंचधियज्ञानाकाराः पंचाभिमानश्चेति ९ हेवीरभू
मीः विषयानविषयानेवाह गंधादयः पंचज्ञानेंद्रियद्वाराणां वृत्तीनां विषयाः आकृतिरूपं श्रवः शब्दः वि
सर्गादयः पंचकर्मेंद्रियद्वाराः कर्माकारवृत्तीनां विषयः रतिः संभोगः अर्तिर्गतिः ८ पुरस्याभिमानविषय

गुणानुरक्तं व्यसनाय जंतोः क्षेमाय नैर्गुण्यमथो मनः स्यात् यथाप्रदीपो घृतवर्तिमश्नन्शि-
खाः सधूमा भजति ह्यन्यदा स्वं ८ पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वं एकाद-
शासन्मनसो हि वृत्तयः आकूतयः पंचधियोऽभिमानः ९ मात्राणि कर्माणि पुरं च तासां वदंति
हैकादश वीर भूमीः गंधाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः १ एकादशं
स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो-
विकाराः ११ ॥

च प्रकारमाह एकादशं स्वीक्रियत इति स्वीकरणं ग्रहणमर्थः शरीरमभिमानस्य न ज्ञेयं तया गंधादिवद्विष
यः नापि कार्यं तया विसर्गादिवत् किंतु ममेति भोगायतनत्वेन स्वीयतया विषय इति एके त्वविवेकिनामेवं पु
रं ममत्वाभिमानविषयः न तत् मूढानां अन्तो मूढदृष्ट्या अहमहंकारं द्वादशं वृत्त्यंतरमाहुः नस्यं च पुरमेव शय्या-
मेके द्वादशं विषयमाहुः तत्र हि जीवोऽहंकारेण शेते यतः पुरि शयनात्पुरुष इति द्रव्याद्यैः तासां वृत्तीनां भवांतरभे
देनानेकत्वमाह द्रव्याणि विषयाः स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टं कालः क्षोभनिमित्तैः
११ ॥

प्रथमं शतशः सहस्रशः ततः कोटिशः स्युः न तु मिथः स्युः न च स्वतः किं तु क्षेत्रज्ञतः परमेश्वरात् तस्य चानेकशक्तिमत्त्वे
नेन स्युरित्यर्थः यद्वा नामीषां मिथ्यात्वमनेनोच्यते कोटिशो भवन्त्यनन्ताः क्षेत्रज्ञत एव स्युः तन्मन्त्रयैव मनसा लभेरन् न तु
मिथो न च स्वत इति यद्वा क्षेत्रज्ञाज्जीवस्तस्मात् स्युः तस्याविकारित्वात् न मिथः इतरेतराश्रयापत्तेः न स्वत आत्माश्रयापत्तेः अ
तो मिथ्याभूता एवेति १२ तदेवं स्थूलकर्मयोग्यगुणकर्मानुरूपं मनोवृत्तीः श्रयत इति यदुक्तं तत्संविवेकश्रमदानत्वं श्रयत इति य
दुक्तं तदेव तत्त्वमाह क्षेत्रज्ञ इति जीवस्य जीवोपाधेः अविशुद्धकर्तुर्मनसः नित्याः प्रवाहरूपेण विच्छिन्ना जाग्रत्स्वप्नयोराविर्
भूताः पश्यति क्वापि सुषुप्तौ तिरोभूताः पश्यति अतस्तस्याश्रयसाक्षी क्षेत्रज्ञ आत्मा तत्त्वमित्यर्थः १३ क्षेत्रज्ञो द्विविधः त्वंपदार्थो

सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः १२ क्षेत्रज्ञ एता मनसो विभूतीः जीवस्य माया
रचितस्य नित्याः आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः १३ क्षेत्रज्ञ आत्मा पुरुषः पुराणः
साक्षात्स्वयंज्योतिरजः परेशः नारायणो भगवान्वासुदेवः स्वमाययात्मन्यवधीयमानः १४ यथानिलः स्थाव
रजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः १५

जीवः तत्पदार्थ ईश्वरः चेत् तत्राद्यो निरूपितः इदानीं तत्त्वमीश्वरं निरूपयति क्षेत्रज्ञ आत्मा व्यापी पुराणो जगत्कारणभूतः
पुरुषः पूर्णः साक्षादपरोक्षः स्वयंज्योतिः स्वतत्त्वज्ञानस्य विषयत्वेनाश्रयत्वेन वा परोक्षः अजो जन्मादिशून्यः परेषां ब्रह्मा
दीनामपीशः नारं जीवसमूहः अयनं यस्य नियन्तृत्वेन भगवानैश्वर्यादिषड्गुणवान् वासुदेवः सर्वभूतानामाश्रयः
स्वाधीनया मायया आत्मनि जीवे अवधीयमानः अवस्थाप्यमानः कर्मकर्तरि प्रयोगः तन्नियन्तृत्वेन वर्तमान इत्यर्थः
१३ एतत्सदृष्टान्तमाह यथेति आत्मस्वरूपेण
प्राणरूपेण ईशेत् नियमयति इदं वि
श्वम् १४ ॥ १५

नदेवमात्मनः शुद्धत्वे संसारस्य च मिथ्यात्वं प्रदर्श्य तन्निवृत्तिमाह तत्र श्लोकद्वयेन देहीव गुणोदयेन ज्ञानोत्पत्त्या याव
न्मायां विधूय--- तन्नेव वेद तावदिह न भ्रमति १६ यावच्च विषयानुबंधं मन एवानर्थहेतुरिति न वेद तावन्निर्वेदाभा
वात्मविभ्रमस्तेवेत्याह नेति आत्मनो लिंगमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावत् भ्रमती।१७।

न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतेह
तावत् १६ न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य यच्छोकमोहामयरागलोभवैरानु
बंधं ममतां विधत्ते १७ भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः गुरोर्हरेश्चरणोपास
नास्त्रो जहि व्यलीकं स्वयमात्ममोषम् १८ इति श्रीभागवते महापुराणे पंचमस्कंधे ब्राह्मणर-
हूगणसंवादे एकादशो
ध्यायः
११

दुर्वेगः तापावपनं क्षेत्रं ततः यन्मनः शोकाद्यनुबंधं च विधत्ते १७ तस्माद्भ्रातृव्यं शत्रुं अदभ्रवीर्यं महाप्रभावं
उपेक्षयाध्येधितं संप्रवृद्धं स्वयं व्यलीकं मिथ्याभूतं तथाप्यात्मानं मुष्णातीति तथा तं गुरुरेव हरिस्तस्य चरणोपासनमेवा
स्त्रं यस्य तथाभूतः सन् जहि घातय १८ ॥
इति श्रीभावार्थदीपिकायां पंच
मस्कंधे एकादशोध्यायः ॥

द्वादशे पुनरापृष्टः संदेहेन महीभृता सयोगी सर्वसंदेहानपानुददितीर्यते कारणमीश्वरः तस्यैव लोकसंग्रहणार्थो विग्रहो यस्य स्वरूपेण परमानंदप्रकाशेन तुच्छीकृतो विग्रहो येन अवधूतयोगेश्वर द्विजबंधोर्लिंगेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः विशेषतः प्रहृष्टस्तद्वाक्यमभिनंदति ज्वरएवामयो रोगः तेनार्तस्य यथा सत् सम्यगु-अगदमौषधं तथा च निदाघेन दग्धस्य संतप्तस्य हिमांभः शीतलमुदकं गांगादकं वा तथा हे ब्रह्मन् तव कुत्सिते देहा-भिमानोहंकारः सएवाहिः तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तव वचः अमृततुल्यमौषधं २

रहूगण उवाच नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय नमोवधूतद्विजबंधुलिंगनिगूढनित्यानुभवाय तुभ्यं १ ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः कुदेहमानाहिविदष्टदृष्टेः ब्रह्मन्वचस्तेमृतमौषधं मे २ तस्माद्भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधं अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ३ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलं न ह्यंजसा तत्त्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे ४

॥ तम ॥

मम संशयाय विषयसंशयार्थं पश्चात्प्रक्ष्यामि अधुना तावत् त्वदुक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवा-त्येवं व्याख्याहि कौतूहलयुक्तं चेतो यस्य मम ३ तयोदितं व्यक्तमविप्रलब्धमित्यादिना भारवाहनादिक्रियावत्-फलं च श्रमादि प्रत्यक्षादिभिर्दृश्यमानं सत् अबाधितमपि व्यवहारमात्रमूलं यद्वा सतः अबाधित-स्य व्यवहारस्य मूलं कारणमपि न तत् अंजसा तत्त्वविमर्शनाय क्षममिति भवानाह यदाह अमुष्मिन्नर्थे मम मनो भ्रम-ति ४ ॥

अबाधितत्वमसिद्धमित्याह हे पार्थिव यः पार्थिवो विकारः स च पृथक्कस्य हेतोः कस्माद्विकारणात् पृथिव्यां चलन्न
यं भारवाहकादिर्जनो नाम प्रसिद्धः यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः तस्य च जडत्वान्न भारः अस्तु
किं च भगवदेवं यदि अस्मत्पादयोर्निरूप्येत न त्वेनदस्ति अवयवव्यतिरेकेण अमास्पदस्यावयवविना निरूपणा
दित्याशयेनाह तस्यापि पृथ्वीविकारस्यापि चांघ्र्योरधि उपर्युपरि गुल्फादयः उरसः स्तनोपलक्षणार्थः ५ शिबिकाया
मप्यवयवी नास्ति व्याप्तिनास्ति तदाह सौवीरराजइत्यपदेशो नाममात्रं यस्य स पार्थिवो विकार आस्ते राजेति संधिरा

ब्राह्मणउवाच अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः तस्यापि चांघ्र्योरधि गुल्फ
जंघाजानूरुमध्योरशिरोधरांसाः ५ अंसेऽधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते यस्मिन्भवा
न्रूढनिजाभिमानो राजास्मि सिंधुष्विति दुर्मदांधः ६ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्या निगृह्णन्नि
रनुग्रहोऽसि जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ७ यदा क्षितावेव चराचरस्य विदा
म निष्ठां प्रभवं च नित्यं तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययानुमेयं ८

र्षः यस्मिन्भवान्रूढाभिमानः सिंधुषु राजास्मीति दुर्मदेनांधः सन् ६ शोच्यान्विष्ट्या निगृह्णन् निष्कृपो वर्तसे अ
तो नाम इष्ट एव गोप्तास्मीति श्लाघमानो महतां सभासु न शोभसे यतो धृष्टः ७ न चोक्तरीत्यावयवभावः सर्वत्रावयवा
नां भवेदिति वाच्यं तेषामप्यनिरूपणादित्याशयेनाह यदेति निष्ठां नाशं प्रभवमुत्पत्तिं विदाम विद्मः तत्तदा क्षितेरप्य
स्य विकारस्याभवत्वात् नाममात्रादन्यत् व्यवहारस्य मूलं कारणं अर्थक्रियया सदित्यनुमेयं निरूप्यतां तथा च श्रुतिः
वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ८ ९ ॥

तर्हि क्षितेः सत्यतास्यात् तत्राह एवंक्षितिशब्दस्यापि वृत्तं वर्तनं अर्थो विनैव निरुक्तं यद्वा क्षितिशब्दस्य वृत्तं यस्मिन् तदपि
मिथ्यात्वेन निरुक्तमित्यर्थः कुतः असत्सु स्वेषु परमाणुषु स्वकारणभूतेषु निधानात् लयात् अतः परमाणुव्यति
रेकेण क्षितिर्नास्तीत्यर्थः परमाणवस्तर्हि सत्याः स्युः तत्राह ये इमे मनसा कार्यानुपपत्त्यादिभिः कल्पिताः कल्पनाबीज
माह येषां समूहेन विशेषः कृतः तेषां समूहः पृथिवीबुद्ध्यालंबनमित्यर्थः अवयविनो निरसनात् समूहग्रहणं
तथापि सत्याः स्युः न अविद्यया प्रपंचस्य भगवन्मायाविलसितत्वात् अज्ञानेन कल्पिताः ९ एवमन्यदपि कृशत्वादि

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो
विशेषः ९ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् द्रव्यस्वभावाशयकालकर्मना
म्नाजयावेहि कृतं द्वितीयं १० ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यं प्रत्यक्प्रशांतं भग
वच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति ११

धर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनाम्ना उपलक्षितया अजया मायया कृतमवेहि तत्र कृशो ह्रस्वः स्थूलं तत्र
नियोगि अणुर्दीर्घो बृहद्गुणपादानात् असत्कार्यं सत्कारणं जीवं चेतनं अजीवं जडं १० तर्हि किं सत्यं तदाह ज्ञा
नं सत्यं व्यावहारिकसत्यत्वं व्यावर्तयति परमार्थं हन्ति ज्ञानमवबोधार्थानि षड्विशेषणानि विशुद्धं तत्राविद्यकंपकं
तन्नामारूपं अनंतरं देशतो बहिः बाह्याभ्यंतरशून्यं तत्र विपरीतं ब्रह्म परिपूर्णं तत्र परिच्छिन्नं प्रत्यक् तत्र विषयाकारं प्र
शांतं निर्विकारं तत्र देवं सत्रूपज्ञाने सत्यमित्युक्तं कीदृशं तत् षडैश्वर्यादि षड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य यद्वा ज्ञा
नं वासुदेवं वदंति ११

श्रीः भा०पं टी० ३०

यतस्त्वामित्थं महत्सेवां विना न भवतीत्याह रहूगणेति एतत्तु ज्ञानं तपसा पुरुषो न याति इज्यया वैदिककर्मणा
निर्वपणात् अन्नादिसंविभागेन गृहाद्वा तन्निमित्तपरोपकारेण छंदसा वेदाभ्यासेन जलाग्न्यादिभिरुपासितैः १२
अहत्सेवया तत्प्राप्त्युपायतामाह यत्रेति यत्र महत्सु ग्राम्यकथानां विघातो यस्मात् १३ विषयसंगस्य योगभ्रंशक
इति वदन् कथं तर्हि त्वमीदृशमसीति प्रश्नस्योत्तरमाह अहमिति दृष्टाभ्यां विमुक्तोहं दृष्टश्रुताभ्यां संगनिमित्तो बंधो
येन हतोर्थः प्रयोजनं यस्य १४ श्रीकृष्णार्चनं प्रभवं यस्या हरतीत्याह सेति जनसंगात् विशंकमानः अविवृतः

रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा न च्छंदसा नैव जलाग्निसूर्यैर्विना महत्पादर
जोभिषेकं १२ यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः निषेव्यमाणोनुदिनं मुमु
क्षोर्मतिं सतीं यच्छति वासुदेवे १३ अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः आराधनं भ
गवत ईहमानो मृगोभवं मृगसंगाद्धतार्थः १४ सा मां स्मृतिर्मृगदेहेपि वीर कृष्णार्चनप्रभवा नो
जहाति अथो अहं जनसंगादसंगो विशंकमानोविवृतश्चरामि १५ तस्मान्नरोसंगसुसंगजातज्ञाना
सिनेहैव विवृक्णमोहः हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः १६

इति श्रीभागवते पंचमस्कंधे द्वादशोध्यायः १२

सुप्रकटः १५ असंगैर्महद्भिर्यः सुसंगस्तेन जातं ज्ञानमेवासिः तेन मोहः सन्नध्वनः संसारमार्गस्य अतिशायनं
श्रेष्ठं यावेद्धरिं याति यद्वा पारमतिप्रतिक्रम्य हरिं याति अतिरतिक्रमणे वैतिकर्मप्रवचनीयत्वात् द्वितीया तस्य
हरेरीहानां कथनश्रुतिभ्यां लब्धा स्मृतिर्येन सः १६ इति श्रीभावार्थदीपिकायां पंचमस्कंधे द्वादशोध्यायः
२ ॥

भयोद्वेगो विरक्तापदृष्टान्तेन निरूपणं इति वैराग्यप्रदास्त्रीय भवाटव्युपवर्ण्यते अध्वनः पारमित्युक्तं तमेवाध्वानं प्र
सिद्धमार्गरूपेणैव वैराग्याय प्रपंचयति दुरत्यये इत्सरे अध्वनि अवद्ध त्रिमार्गैरजस्तमः सत्वैर्विभक्तानि कर्माणि कार्य
तया पश्यतीति तथा स एव प्रसिद्धः सार्थो जीवसमूहः अर्थपरः स्वार्थपरः सन् यथा वणिक्सार्थो यौन्नायकः
बद्धः अटवीं याति तद्वत् अस्माध्यायस्य व्याख्यानरूप उत्तराध्यायोऽस्ति तथापि स्वत्वप्रतिपत्तये किंचिद्व्याख्यायते यस्यां
भवाटव्यां इमे इंद्रियनामानः षट् दस्यवः चौराः कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं सार्थं विलुंपंति तस्य धर्मधनं लुंप

ब्राह्मण उवाच दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमः सत्वविभक्तकर्मदृक् स एष सार्थोऽर्थपरः परिभ्रम
न्भवाटवीं याति न शर्म विंदति १ यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात्
गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः २ प्रभूतवीरुत्तृणगुल्मगह्वरे कठो
रदंशैर्मशकैरुपद्रुतः क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहं ३

भोगेन मुष्णंतीत्यर्थः गोमायवः सृगालास्तत्स्थानीयाः पुत्रादयः ते अमे भर्तापि ते न्यवं प्रविश्य प्रमत्तं सार्थिकं सार्थे
स्थितं हरंति इतस्ततश्चाकर्षंति उरणं मेषं २ वीरुधो लतास्तृणानि च गुल्मानि वल्लितादिजालानि प्रभूतैर्वेतैर्गा
ह्वरैः प्रवेष्टा गेऽकठोरैः तीव्रैर्दंशो मक्षिकाविशेषैः मशकैश्च यथा कश्चिदुपद्रुतो भवति एवं कामधर्मादिभिर्गा
ह्वरे गृहाश्रमे वर्तमानो दुर्जनैरुपद्रुतो भवतीत्यर्थः गंधर्वपुरवदस्थिरं स्मानमेव देहादिकं प्रकर्षेण सत्यमेव दृष्टमि
ति पश्यति क्वचित्क्वचिदपि चाशुरय उत्तिवेडल्मुकाकारो ग्रहः पिशाचः तत्तत्स्वर्णमुपादेयत्वेन पश्यती
त्यर्थः ३ ॥

श्री: भा.पं. टी. २८ निवासादिष्वात्मास्वभावोयस्याःमावुद्धिर्यस्यसः ततस्ततोधावतीत्युभयत्रतावानेवार्थः वात्यावक्रगतःत
स्याउत्थितःपांसुःतेनधूम्राविशःरजस्वलेरजोयाभिश्चदिशोयस्यसन्नयथानजानाति तथावामेवभ्रमंतीया
स्त्रीतस्याउद्भूतैरागादिभिःअप्रकाशमानादिक्देवताःकर्मसाक्षीश्चतानजानातीत्यर्थः ४ अदृश्यानांझिल्ली
नांभृंगादिकासंज्ञानांकीटविशेषाणांस्वनैःकर्णयोःशूलोव्यथायस्यउलूकाश्चकास्तेषांवाग्भिर्व्यथितोनरआ
त्मामनोयस्य अप्रत्यक्षवत्तमप्रियवक्तारोझिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारोउलूकतुल्याः येषांछायापापा

मू

निवासतोयद्रविणात्मबुद्धिस्ततस्ततोधावतिभोअटव्यां क्वचिच्चवात्योत्थितपांसुधूम्रादिशोनजा
नातिरजस्वलाक्षः ४ अदृश्यझिल्लीस्वनकर्णशूलउलूकवाग्भिर्व्यथितोनरात्मा अपुण्यवृक्षा
न्श्रयतेक्षुधार्दितोमरीचितोयान्यभिधावतिक्वचित् ५ क्वचिद्वितोयाःसरितोभियातिपरस्परंवा
लषतेनिरंधः आसाद्यदावंक्वचिदग्नितप्तोनि
र्विद्यतेक्वचयक्षैर्हृतासुः ॥

॥ ६ ॥

पक्षेतुः तेअपुण्यवृक्षान्तत्तुल्यानधार्मिकानुसेवतेमरीचितोयानीतितैः फलत्वेनचित्तस्थानपिविषयान्
५ वितोयाःशुष्कसरितइहपातितस्यगात्रभंगात्तस्माद्दुःखंभवतिनचोदकलाभः तद्वदिहपरत्रचदुःखदान्
पाखंडानभियाति आलषतेछायाद्यादिभ्योअन्नादिवांछति उभयत्रापिसमानार्थः दावाग्नितुल्यैर्दुःखदैर्दु
राप्तधनोकाम्याग्निनातप्तोनिर्विद्यतेविषीदतितथायक्षतुल्यैःराजभिर्हृतेअसुवत्प्रियेधनेयस्यसनिर्विद्यते ६

॥ राम ॥

अन्ये पुरुषे हन्तं स्वं विज्ञेयस्य निर्विसंवेत्तो यस्य कश्मलेशः श्रौतं गंधर्वपुरमिव मनोरथोपगत पितृपुत्रादिस
माने प्रविष्टः सन् ७ केरकादिस्त्रग्रिविविचित्रै रभिभूतः नगनल्पमहत्कर्मारोहुं कर्तुमिच्छुर्विमनाइवश्रान्ते
पदे पदे तत्तोत्तो अन्यं न रेणावहिनार्जं रेणा ८ प्रजगराहिनाविशश्चापणागिलितो नवेत्ति विपिने यकः
शावइवदंदशूकैर्हिंस्त्रैर्जनैर्दष्टः पीडितः अंधोन्धमविवेकः अंधकूपे मोहे पातितः तामिस्त्रे दुःखे शेते लीयते

कुत्रचिदृतासः कचनिविष्टवेगाः शोकाग्निमत्यनुपश्यति कश्मलं कचिद्गंधर्वपुरं शविष्टः प्रमोद
ते निर्वृतवन्मुहूर्तं ७ चलतः क्वचित् केन्द्रकशार्कतोऽग्निर्नयाकृत्वा विमनाइवास्ते पदे पदे ऽन्यं न स्वाङ्गि
नार्दितः कौटुंबिकः क्रुध्यति वै जननाथ ८ कचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिने
पविद्धः दष्टः स्म शूनेव्व वर्दंदशूकैरथो अंधकूपे पतितः तमिस्त्रे ९ कर्हिस्म चित्क्षुद्ररसान्वि
चिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुंपंत्यथ तं ततोन्ये
१० कचिच्च शीतातपवातवर्ष प्रतिक्रियां कर्तुमनीश आस्ते कचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृ
च्छत्युत वित्तशाठ्यात् ११

७ क्षुद्ररसान्मधुप्रयोषादीन् विचिन्वन् गवेषयन् तन्मक्षिकाभिर्योषादिस्वामिभिर्विमानः अवज्ञातः ताडितः सन् व्य
थितो भवति यदि कथंचित् तेनातिक्लेशेन प्रतिलब्धमानः प्राप्तयोषादिर्भवति तदा बलात् तस्य पहरंति तान्यथासिद्धं के।
ततो ऽन्ये तदाप्यन्ये हरन्ति १० यत्किंचिद्वित्तस्य मपि मिथो व्यवहारं तत्क्रियादिना गृहीत्वा न वित्त शाठ्यात् धनवंचनात्
११ ॥ ॐ नमो भगवते वासुदेवाय ॥

श्रीः
१६
भा०टी
१०

शय्यादिहीनः आस्यते स्मि त्रिसामनं केवलादि स्थीयते वेति स्थायते वेति स्थानं गृहं विहरंत्यनेनेति विहारो या
दि याचमानो पि यदा परस्माद् प्राप्तकामः तदा परकीयेवस्तुनि दृष्टिरभिलाषो यस्य सेवमानं प्राप्नाति ८ एवम्
योन्यं विनश्यति संगे साधनविनिमयेन विरुद्धो वैरानुबंधो यस्य न यथा विधोपि परस्परं विवह गृविवाहादि संबंधं
वन्नु रुभिः कृच्छैः श्रमैः विनबाधैः उपसर्गैश्च दुःखादिभिर्विपन्नः मृतप्रायो भवति ८ डरमयतममधनोदर्शयति

कविन्द्रा विलीणाथ नस्तनास्मिन् शय्यासनस्थानविहारहीनः याचन्परात्प्रतिलब्धकामः पार
क्यदृष्टिर्लभते वसानं ५२ अन्योन्यविनश्यति संगाद्दृढवैरानुबंधो विवहान्मिथश्च श्रथन्नयुष्मि
न्नुरुकृच्छ्रविनवाधोपसर्गैर्विपद्यन्विपन्नः ५२ तांस्तानुविपन्नान्सहितनजनविहायजातेपरिगृह्य
नार्थः आवर्तनेष्वपि न कश्चिद्दवीसाधनः पारमुपैति योगं मनस्विनो निर्जितदिग्गजेंद्रममेति
सर्वेभुवि विरुद्धवैराः मृधेशयीरन्नतदुजेतिय
ग्रसन्दंडगतवैरोभि
याति ५२

तावत्तानुविपन्नान्सतान् विहायजातेन्यानेपरिगृह्य विहरन्पूतः यतः प्रस्थितः नेशतिनावर्तने हेवीरसाधनः पारे
पोयोगः नेवनोपैति अत्रमाथैकश्चिदतिसमर्थोपि ५४ नदेवाह मनस्विनः शूराः निर्जिताः दिग्गजेंद्रायैः
ममेयं भूमिर्ममेयमिति भुविनिमित्तभूता यावद्वैवैरेयैः न्यस्तदंडः संन्यासी यद्विलोः पदमभियाति तन्नजनब्रजे
ति ५५ ॥ रामराम

सिंहावलोकेनेन पुनर्बर्भवाटवीमेवानुवर्त्तयति प्रसज्जतित्यासक्तिं करोति कीदृशः लतानांपुञ्जाः पुष्पावाल
वृत सकुमारायेत्यीर्णापुञ्जाः तदाश्रयः सन् तदाश्रयाश्रवन्नपदाश्रस्पृहादराः कलभाषिणोयोद्वि
जाः पदिजः एणः तत्रत्यीषु स्त्रीसंगप्रसक्तेषुपत्येषु स्पृहायस्यतादृशोभूत्वाहरिवक्केसिंहासपृहः तत्र
त्यात्कालवक्कनिमित्तात्ममरणादेः त्रसन् तत्परिहारायकश्चित्पलोभितावकादिवहेचकैःक्रूरैःक्रू
रैस्थणाचारैःसहसख्यंकरोतितेषप्रविशति २९ नैवंविनः तत्रफलाभावंज्ञात्वाहेमानोब्राह्मणानांकुले
पुनःप्रविशन् तेषांशीलप्रायश्चित्तपूर्वकंपुनर्न्यपिनयनाद्याचारंप्रेरोचयन् प्रधियंप्रपन् वानरत्वत्त्या

प्रसज्जतिक्वापिलतानिकुञ्जाश्रयान्नदाश्रयावन्नपदद्विजस्पृहः क्वचित्कदाविद्धरिवक्रमः
त्रसन् सख्यंविदधेवकवेककगृध्यैः २९ नैवंविनोहेमसकुलेसमाविशन्प्ररोचयन्शीलमुपैति
वानरान् तज्जातिरासेन स्वनिर्हृतेंद्रियःपरस्परोद्वीक्षणविस्मृतावधिः ३० द्रुमेषुरंस्यन्सुता
दारवत्सलोव्यायदीनोविवशःस्वबंधनः क्वचित्प्रमादाद्गिरिकंदरेपतन्वल्लींगृहीत्वागजभीत
आस्थितः ३१ पुनःकथंचित्सविमुक्तआपदःपुनस्सार्थंप्रविशत्यरिंदम अध्वन्यमुष्मिन्न
जयानिवेशितोभ्रमञ्जनोद्यापिनवेदकाष्ठन ३२ रजस्तमःसत्त्वमपिहायधनोसमेन्यस्तदंडःकृत
मैत्रः प्रसज्जितात्माहरिसेव्याशितज्ञानासिमादायतरातिपारम् ३३

न प्रवावानन् स्पृदप्रापायावपेति तज्जातिरासेनवानरजातिक्रीडयामिथुनीभूयपरस्परवीक्षणेन
नविस्मृतोजीवितावधिर्येन ३० द्रुमवत्केवलदृष्टार्थेषुगृहेषुव्यवायदीनोहिस्त्रीकृपाकृपणः एवं
स्वयंबंधनेप्राप्तितस्मिन् विवशः परिहर्त्तुमशक्तः पाकांतरेभवनेसंसारेचरन्नित्यर्थः गिरिकंदरवद्दुर्नि
भयानकरोगादिदुःखेपतन् केदरस्यगजनत्यां मृत्योर्भीतःसन् वल्लीतत्यप्राचीनकर्मावस्थितोवलेवा
भवति ३१ सार्थंप्रविशतियथापूर्वंप्रवृत्तिमार्गेरमते ३२ त्वमप्यध्वनिनिवसितस्यतत्त्वेषगः अनोऽस्या
ध्वनः पारमवितरप्रसज्जितात्माविषयेष्वनभिनिवेशितचित्तःसन्हरिसेवयाशितेनेतीक्ष्णीकृते ३३ ॥ ॥

अखिलजन्मसु शोभनं नृजन्मैव परं श्रेष्ठं येभ्यो देवादिजन्मभ्यः तैरपि किं अमुष्मिन् स्वर्गेऽपि जन्मभिः किं न
किंचित् यत् येषु जन्मसु यत्र स्वर्गे वा वो महात्मनां समागमः प्रचुरो भवति हृषीकेशस्य यशसा कृतः
शोधित आत्मा वैस्तेषां २१ तेन न मयोपासितः त्वच्चरणाब्जरेणुभिर्हतं नष्टं अंहो यस्य तस्य यो ह्यद्भुते निर्मला भक्ति

रहूगण उवाच अहो नृजन्माखिलजन्मशोभनं
किं जन्मभिस्त्वपरैरप्यमुष्मिन् न यद्धृषीकेशय
शःकृतात्मनां महात्मनां वः प्रचुरः समागमः २१
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधो
क्षजेऽमला मौहूर्तिकाद्यस्य समागमाच्च मे
दुस्तर्कमूलोऽपहतोऽविवेकः २२ नमो मह
द्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम
आवटुभ्यः ये ब्राह्मणा गामवधूत
लिङ्गाश्चरन्ति तेभ्यः शिवमस्तु रा
ज्ञाम् २३

भवतीति नैवाद्भुतं यस्य तव मुहूर्तमात्रभवात्समागममात्रादपि दुस्तर्केणाबद्धमूलोऽपि ममाविवेको
नष्टः २२ अवधूतलिङ्गाः केन रूपेण विचरन्तीत्यज्ञानानां सर्वोत्तमस्थानिनमस्यति ये वरस्तोवीक्षणत्वात्स्वरूपं
धीरैयास्तान्प्रतिपसर्वेभ्योनमस्तस्यार्थः स्वदर्शनेन राज्ञां महद्भ्वज्ञासंभाव्याहराणां शिवमस्त्विति २३ ॥

उत्तरमानाय स्य हे उत्तरामातः विगणयतः नगणयतः अवमंतर्यपि परमकरुणाकत्वेन सिंधुपतये आ(
त्मतत्त्वमुपदिश्य निभृताः शांताः करणानामूर्मयो यस्मिन् सचासावाशयो यस्य २४ सुजनात्सात्त्वगतप
रमात्मसतत्त्वं येन तथाभूतः सन् तदानीमेव देहेत्यात्ममतिं च विससर्ज हे नृप भगवदाश्रितो भरतः तदाश्रि
तो रहूगणोयः तस्यानुभावः सद्यो देहाहंकारत्यागः २५ परोक्षेणावाणोक्तार्थकत्वपकेण आर्याणां

शुक वाच इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानुभावः
परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवंदितचरण आपूर्णार्णव इव निभृतकर
णोर्म्याशयो धरणिमिमां विचचार २४ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यवि
द्याध्यारोपितां देहात्ममतिं विससर्ज एवं हि नृप भगवदाश्रिताश्रितानुभावः २५
राजोवाच यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः परोक्षेण
वचसा जीवलोकभवाध्वा स ह्यार्यमनीषिकया कल्पितविषयो
नांजसाव्युत्पन्नलोकसमधिगमः अथ तदेवै
तद्दुरवगमं समवेतानुकल्पेन निर्दिश्य
तामिति २६ इति भाग तेप
चम येश्वयो शोध्यायः १३

विवेकिनां मनीषयैव दस्युस्थानीयानींद्रियाणि गोमायुस्थानीयान्यपत्यादीन्येत्येवं कल्पितविषयः अव्युत्पन्न
स्य लोकस्य जनस्य सम्यक् अधिगम्यो न भवति अथातः तदेतद्देव भवाध्वरूपं समवेतानुकल्पेन शब्देनेन तदा(
त्वदुक्तपार्थाय कल्पनेन २६ इति भावा दीपि यांपे मस्कं त्रयो शोध्यायः १३ ॥ ॥

श्री॰
भा॰ पं॰
टी॰
अ॰

चतुर्दशे भवारण्यरूपकन्याहृतोक्तिः कृताः प्रस्तुतेन स्वगोमायमवाप्रकाश्चार्थकल्पनं यः परोदितात्प्रश्नः
शुक उवाच सहोवाचेति स्पष्टोक्तिः इतस्ततो यथार्थस्य जयानिवेशनमिति यदुक्तं तदेवेति निवेशनप्रकारकथनेन प्रपंच
यति यद एष प्रसिद्धो जीवलोकः प्रचंडवित्तामायया अस्तर्गमेऽध्वन्यापतितो भवाटवीगतः सन् हरिगुरुपदस्य गुरो
श्चरणारविंदयोर्मधुकराः सेवकाः तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गं प्राप्यापि नावरुंधेन संप्राप्नोतीत्यन्वयः
मायया स्वकार्यद्वारेण संसारमार्गपातहेतुत्वमाह देहात्ममानिनो सत्वादिगुणविशेषविकल्पिताना निविभ

स होवाच यथा देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मि
तविविधदेहावलीभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन् दुर्गा
ध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सा
र्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि वि
फलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे यस्याम्
ह वा एते षडिंद्रियनामानः कर्मणा दस्यव एव ते २ ॥

कृतानि यानि कुशलविमिश्रकर्माणि तैर्विनिर्मिताभिर्विविधदेहावलीभिर्वियोगसंयोगादिर्येनादिः संसा
रः तदनुभवस्य द्वारभूतेन तस्मिन् संसाररूपे दुर्गमार्गवदसुगमेऽध्वन्यापतितः यथा वणिजो सार्थः समूहः
अर्थार्जनपरः स्वदेहनिष्पादितानां कर्मणां फलद्वारेणानुभवो यस्य विफलास्तु बहुप्रतियोगाः बहुवि
घ्ना सर्वेहा चेष्टा यस्य सः तस्यां संसाराटव्यां योऽतापाः तेषामुपशमनीं नाशनीं १ यस्यामित्यादि व्याचष्टे या

॥ ८

दस्युजनत्वं तेषां कर्म दर्शयति तथाच येतिधर्मा पायिकं धर्मकारणं तमेव तमेव स्वार्थिश्रेतं धर्ममाह साद्वादिति तं
तु सा पापसंपरलोकार्थमुदाहरंतीति हर्म्यं पथमाह दर्शनाद्याः पंचज्ञानेंद्रियाणां हृत्तयः संकल्पव्यवसायावंतः
करणस्य पनेगृहेयो ग्राम्यके उपभोगः तेन ऊनायस्य ऊगुडेरजितात्मनो विलंपतिय थाचौराः ऊपालकस्य
धनं वहिताजात्मनः सार्थस्य धनं हरंतितद्वत् ३ गोमायुवायत्रेत्येतद्यावहे अथवेति अथवेत्यर्थांतरोपन्यासेक

नद्यथा उक्त्ष स्य धनं यत्किंचित्साद्वाहर्म्या पायिकं बहूहं कुलाधिगने सत्परमडुरुषार्थं साधनलद्
णो सौ धर्मः तेन मां पापायउदाहरंति नहर्म्यं धनं दर्शस्पर्शनश्रवणस्वादनाविज्ञाणसंकल्पव्याव
सायगृहग्राम्योपभोगेन ऊनायस्य अजितात्मनो यथा सार्थस्य तथाजितात्मनो विलुंपंति ३ अथव
यत्र कौटुंबिकादाराप त्यादयो नाम्ना कर्मणां हृकस्मगालाः एव अनिर्छतोपिकदर्य्यस्य ऊडुंबिनउर
णकवत् संरद्यमाणांनपि घतोपि हरंति ४ यथाद्यत्र अवक्षरेहकृ धमाणाम दरयर्थवीजं देत्रं उन रेवाव
पन काले गुल्मतृणावीरुद्भिर्गहरमिवभवति एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्नहिकर्माणि उत्सी
दंतियद्वयं कामकरंड एषश्रावसथ्यः ५ ॥

कर्मणं उहकाः स्रगालाः च कदर्य्यस्यानिलछस्य ४ अछन्नेवीरुत्तृणगुल्मगह्वरमित्येतद्यावद्वपेय थाहीति
नेत्रद्रव्याणि बीजानि यस्मिन् यद्यस्मात् योयमावसथ्य आश्रमः एषकामानां करंडः यथा कर्पूरभाजने कर्पूरदे
येपिपरमलो न क्षीयते एवमत्रवासनानाम क्षीणत्वान्न कर्माणि उत्सीदंतीत्यर्थः ५ ॥ ॥

श्री: भा: पं टी: ५२

दंशमशकमत्कुणैरपसर्पैर्जीवैः शलभादिभिश्च उपहन्यमानः पीड्यमानो बहिः प्राणाविव्रंयस्तनयाविवोप्य
स्मिन्नध्वनि परिभ्रमन् अविद्यादिभिरुपरक्तेन मनसा गन्धर्वपुरं नल्पमवटमानेन नरलोके सत्यतमामिथ्यादृष्टिरुप
पश्यति ६ अपश्यतीति शाल्मलिवृक्षमिव नमर्यान्तरं दर्शयति नत्रतु गन्धर्वपुरी क्वचिद्दातपोदकं शृगन्तस्माज्जलेन
न्नत्वात् विषयाननुपधावतीति १ क्वचित्तु चित्तस्यरयोल्मुक ग्रहमित्येतद्याचष्टे क्वचिच्छ्रोषाणादोषा
णामस्यानेऽरीषविशेषेऽग्निर्विषाः नस्यशीषस्य वलोहितो वर्णो यस्य रजोगुणास्तेन निर्मितानदिवयाम

नत्रनतो दंशमशकसमापसर्पैर्मवज्जैः शलभशत्रुंतस्करमूषकादिभिरुपहन्यमानबहिः प्राणाः
क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामैभिरुपरक्तमनसानुपपन्नार्थे नरलोके गन्धर्वनगरमुपप
न्नमितिमिथ्यादृष्टिरनुपश्यति ६ क्वचिदातपोदकनिभान्विषयाननुपदाधावति पानभोजनव्य
वायादिव्यसनलोलुपः १ क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर
र्णमुपादित्सत्याग्निकातरइवोल्मुकपिशाचे ७ अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मो
पजीवनाभिनिवेशा एतस्यां संसाराटव्यामितस्ततः परिधावति ८ ॥ ॥

तिर्यस्यसः सुवर्णमुपादातुमिच्छति अग्निकामेन कातरः परवशः उल्मुकसहशोपि पिशाचमिव शीतार्तनरो हार
एपेग्निमज्वाज्वल्यमानं ततस्ततो धावते उल्मुकपिशाचमग्निबुद्ध्यानुधावति न तं प्राप्नोतीति कथञ्चित्ताभःचे
न्नहितेन भक्षितः सन् म्रियते एव सुवर्णमनुधावन्नपीत्यर्थः ७ निवासस्तोयद्रविणान्येतद्याचष्टे अथेति
निवासादिष्वनेकेष्वात्मन उपजीवेषु अभिनिवेशो यस्य सः ८ ॥ ॥

राम: ५२

क्वचित्तु वातोत्थितेनेत्याह चेष्टेक्वचिन्द्वेति आरोहमेकेनस्मिन् कालेयइजः रागः तेनस्वदृष्टावरकेणाजन्या
रात्रौर्भूतामिवहस्तपादेरजनीभूतस्तमोमय इव अतीवरजसाक्रान्तमतिः अतएवरजोध्यानचक्षुरिवेन्द्र
स्थिताममर्यादातिक्रमसादिभूतादेवतादेवतानजानाति ९ अतएवादेयमेवोपादेयतयागृह्णातीति अज्ञ
मसाज्ञात्वाद्रनरलोकचनर्थपादे प्रथमंव्याचष्टेक्वचित्सहृद्दितिक्वचिदातपोद्दकविभानित्वत्रमिथ्या
विष्णुवेधुलपटत्वमुक्तेनिवासतोयेत्यत्रतर्जनप्रयासउक्तः अत्रत्वबाधितेषपिग्नः शहृत्तिरुच्यतइत्यपोनरुक्तं
स्वयमेवस्वसहृदवगतेविषयारण्येवेतथ्यांविफलत्वेयेन यत्राभिध्यानेनदेहाभिनिवेशेनविध्वंसितास्मृति

क्वचिच्चवात्योपमयाश्रमद्ध्यारोहमारोपितस्तत्कालारजसारजनीभूतात्इवासामर्थ्ययदिरजस्व
लादेवादिन्द्रदेवताअतिरजस्वलमतिर्नविजानाति ९ क्वचित्सहृदवगतविषयत्वेनयोः स्वयेप
याभिध्यानेनविभ्रंशितस्मृतिमयैवमरीचितोयायांस्तामेवाभिधावति ११ क्वचिंमहद्गडलद्दकझिल्लीस्ता
नवदतिपरुषरभसाटोपग्रस्तदोपरोदेवारिराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृद
यः समयदाद्गयपूर्वसहृत्तनत्सदाकारस्कारकाकतेद्वायगुणपद्गमलनाविषादयानवद्गभयार्थ
शून्यइवविपाण जीवन्मृतोस्वयंजीवन्
म्रियमाणउपधावति १३

येस्य नयेवविभ्रंशितयास्मृत्यास्मृतिभ्रंशादेवेत्यर्थः ११ महद्गयझिल्लीस्वनेत्येतद्व्याचष्टे क्वचिद्गलूकेति
अतिपारुषारभसउत्साहः तेनाटोपः संभ्रमोयथाभवत्येवंरिपुगणराजकुलस्यत्रनिर्भर्त्सितेनअतिव्यथितेनकर्ण
मूलेहृदयेवयस्य १२ अपुण्यद्दात्रानित्येतद्व्याचष्टेसयदेतिद्दयगपापभ्रंशोपूर्वसहृत्तेयेचकारस्करोविषते
ङ्कः नत्वशुद्धायेप्रपण्डमात्तव्याविपालतास्तविषादपातास्तविषक्रूपाः
नद्गल्पात दत्ताद्दप्रयोजनशून्यधनात् १३ ॥

क्वचिद्दिनेयाः सरितः इत्येतद्व्याचष्टे एकदा क्वचिद्दमनां प्रसंगात्मनिहृता वेविनामविर्धस्य सः निरुदकनदीग
र्तेपातेयथा स्य शिरः स्फुटति पश्चादपि च बहिर्दनाज्ञवर्तनेपश्चमिहृपराज्ञचदुःखदं २४ परस्परं बालयनेति
रेभइत्येतद्व्याचष्टे यस्त्वामिति श्रेयः श्रवेनोपनमतिनेोपनिष्टति पितृपुत्रबर्हिष्मा ऊष्मः तद्धनः पितुः पित्रा
णां वा ऊष्मादिनूणामलमपि येषु पश्यति नानुभद्गयनवाधइत्यर्थः पितृपुत्रबर्हिष्माहियानितिनपाठः
स्वगमः १५ आसाद्य दावमित्येतद्व्याचष्टे क्वचिद्दासायेति क्वचहृयद्दैर्हतासरितोनद्व्याचष्टे क्वचित्काले

एकदा सत्संगान्निहृत पतमतिर्दुरुक्तस्त्रोतसि स्खलनवदुभयतोपि दुःखदं पाषंडमभियाति २४
यदान्नयरवाथयोथ आत्मनेनोपनमतितदाहि पितृपुत्रबर्हिष्मतः पितृपुत्रानुवासखलभद्रया
ति २५ क्वचिद्दासाद्य गृहे दाववत्प्रियार्थविधुरं असुखोदर्कं शोकाग्निनादह्यमानोभृशं निर्वेद
मुपगच्छति २६ क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतमधनासुः प्रमृतकइव वि
गतजीवलक्षणमास्ते २७ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृति
लक्षणमनुभवति २८

नविषमितेप्रतिकूलेमानीतंयजाजकुलेनदेवरक्षसा तेनापहृताः प्रियतमधनतनूपाणसेवोयस्य जीवनानि
जीवलक्षणानि हर्षादीनि यस्य स हूरद्दे नस्वइत्यप्यतेनैवव्याख्यातं २७ क्वचिच्चैगोथर्वप्रविष्टइत्येतद्व्याचे
ष्टे कदाचिन्मनोरथप्राप्तोद्यान्यघमर्देवेसदितिमत्वाऽपूर्वगोथर्वं पुरवद्दृष्टमानदर्शनसन्नं इदानीं तन्निमित्त
सुखास्वादिरूपानइतिभेदः २८ ॥

वलनं क्वचिदितितेनव्याचष्टे क्वचिद्दुराश्रमेयाः कर्मचोदनास्तासेमतिभिरेतिविस्तारः सएवगिरिस्तमारु
रुक्षन् तद्देशेनगतमित्युक्तं १९ यदेयदेश्मेतंनरवह्निनेतिव्याचष्टे क्वचिच्चडः सहेनेति २० क्वचिन्निगीर्णइत्येना
व्याचष्टे सएवेति २१ दृष्टः स्पृशेनइतिव्याचष्टे कदाचिदितिमानोगर्वएवदंदशूकसर्पस्तद्वारत्वात् भग्नमानदं
ष्ट्रायस्य अतएवनलब्धोनिद्रायाअपिदनतोयेन २२ कर्हिस्मचित् द्वाहसोनितेनव्याचष्टे कर्हिस्मकामम

क्वचिद्दुराश्रमकर्मचोदनातिभारगिरिमारुरुक्षमाणोलोकव्यसनकर्षितमनाः कंटकशर्करादे
शप्रविष्टइवसीदति १९ क्वचिच्चडः स्वदेहेनकायाभ्यंतरवह्निनागृहीतसारः स्वकुटुंबायक्रुध्यति
२० सएवपुनर्निद्राजगरगृहीतोंधेतमसिमग्नः शून्यारण्यइवशेतेनान्यत्किंचनवेदशवइवापा
विद्धः २१ कदाचिद्भग्नमानदंष्ट्रोदुर्जनदंदशूकैरलब्धनिद्राक्षणोव्यथितहृदयेनानुदीयमाना
विज्ञानोंधकूपेंधवत्पतति २२ कर्हिस्मचित्कामसुधलावान्विचिन्वन् यदापरदारपरद्रव्याण्यव
रुंधानोराज्ञास्वामिभिर्वानिहतः पतत्यपारनिरये २३ अथचतस्मादुभयथापिहिकर्माणिन्ना
त्मनः संसारवपनमुदाहरेति २४ मुक्तस्ततोयदिबंधा
देवदत्तउपाछिनत्तितस्मादपिविष्णुमित्रइत्यनव
स्थितिः २५

धुलवानितियदानिहतोभवतितदाश्रयसएवनिरयेपततीं २३ प्रसंगात्कृत्स्नस्यकर्मणः संसारहेतुत्वंस्मारय
तिअथचेतियस्मादेवंस्यात् अथअनंतरमेवउभयथाइवहवचपरत्रचअस्मिन्नप्रवृत्तिमार्गेसंसारस्यावपनंज
न्मदेतेकर्माणीत्युदाहरंति २४ तत्रातिकृच्छ्रंपतितलभ्यमानइत्येतव्याचष्टे मुक्तइति
यदिबंधान्मुक्तोभवतितर्हितत्ना सकाशादन्योहरति तस्माद्वया
त्वाः ततसोमोदलभतइत्यर्थः २५ राम ॥

द्रुमेषु रंस्यन् इत्येतद्व्याचष्टे क्वचिद्द्रुमवदिति व्यवायक्षणः मिथुनोत्सवो भवति ३३ क्वचिन्मृत्युगजादित्येतद्व्या
ख्याचष्टे एवमध्वनीत्यवरुन्धानो गिरिकंदरप्रायेन मसि रोगाद्यापदि पतनमिति शेषः ३४ क्वचिच्छी
तवातेत्यादि दुर्वस्यादधिकोक्तिः रोगाद्यापदि पतितः सन् शीतवातादिभिः क्लिश्यन्नोपलक्षत्यर्थः ३५ तद्देवं सिंहा
वलोकन्यायेनोक्तमर्थं व्याख्यानमपहाय व्याख्यायक्रमस्थमनुवर्तयित्वं पूर्वोक्तमेवाह यद्दति क्वचिन्मिथ

क्वचित्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ३३ एवमध्वन्यवरु
न्धानो मृत्युगजभयात्तमसि गिरिकंदरप्राये क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखा
नां प्रतिनिवारणेऽकल्पो दुरन्तविषयविषण्ण आस्ते ३५ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमुपा
याति वित्तशाठ्येन ३६ क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनो
रथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ३७ एवं वित्तव्यतिषंगविवृद्ध
वैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ३८ एतस्मिन् संसाराध्वनि नानाक्लेशोपसर्गबा
धितः आपन्नविपन्नो यत्र यस्तमु ह वावेतरः तत्र विसृज्य जातं जातमुपादाय शोचन् मुह्यन् बिभ्यद्वि
वदन् क्रन्दन् संहृष्यन् गायन् नह्यमानः साधुवर्जितो नैवावर्तते ऽद्यापि यत आरब्ध एष नरलोकसार्थः
यमध्वनः पारमुपदिशन्ति ३९ ॥

इति वित्तशाठ्येन कदाचित् यत्किंचिद्धनमुपयाति ३६ क्वचित्क्वचित्क्षीणधनः त्विति व्याचष्टे क्वचित्क्षीण
धन इति अप्रतिलब्धं यन्मनोरथोपगतं वांछितं तस्यादाने स्वीकारे निश्चितमतिः सन् ३७ अन्योन्य
वित्तव्यतिषंगेनेत्येतद्व्याचष्टे एवं वित्तव्यतिषंगे तैरुपवहति त्यजति ३८ अथान्य
दपि मित्रादि व्याचष्टे एतस्मिन्निति आपन्नः आपद्ग्रस्तः पवित्रो वनिर्बाधा
त्रयः तमितरस्तत्रैव विसृज्य नह्यमानो बध्यमानः साधुवर्जितः साधुव्यतिरिक्तः

आत्महन्तो हेतुमाह यदिदमिति भवस्विनइत्यादि व्याचेष्टे यदीयीति ये वैराजर्षयः तेपिनावरुंधते किंतु परं के
वलं शृणेश्यायीरन् ४९ प्रसज्जतीत्यादि प्रिरिवेश्परेइत्येतमपहृत्यव्याख्यातेग्रथमनतिक्रम्यवल्लीगृहीतेत्यादिश्ये
व्याचष्टे कर्मवल्लीलीमिति एवंप्रपरिस्वगितेतापिमर्त्यलोकसार्ष्टमेवोपयाति ४२ तद्देवं भरतोक्तिं व्याख्यापतद्व
त्तिसंग्रहस्लोकानाह तस्येदं कर्मस्लोके रूपगायेति आर्षभस्य ऋषभपुत्रस्य प्रत्यन्तोनृपः अनुवर्त्मनार्हतिवर्त्मा
नुगंतुं नशक्नोति ४३ तत्रहेतुमाहयइति सद्गाज्यपोहै हैकोयोदुस्त्यजान् विद्याभिवनहौ तस्यार्षभस्यतिसंबं

यदिदं योगमनुशासनेनवापतद्वरुंधते यस्त्वदंप्रजनयदुपशमी शीलाउपरतात्मानः समवगच्छं
ति ४० यद्पिद्दिग्विजयिनोयेवैराजर्षयः किंतु परंशृणेश्यायीरन् अस्यामेवममेयमितिकृत्स्वैरात
वेपुः याविस्लज्यस्वयमुपसेहुनाः ४८ कर्मवल्लीमवलेवाततत्राप्यद्दः कथंचित्तरकाह्रिसन्तःपुना
योवसंसारार्द्धनिवर्तमानोनरलोकसार्ष्टमुपयातिएवमपरितोपि ४२ तस्येदमुपगायति आर्षभस्य
हेराजर्षेमनसोपिमहात्मनः नानुवर्त्मार्हतिनृपामक्षिकेवगरुत्मनः ४३ योदुस्त्यजान्दारसुतान्सु
हृद्राज्यंहृदिस्पृशः जहौयुवैवमलवदुत्तमस्लोकलालसः ४४ योदुस्त्यजान्क्षितिसुतस्वजनार्थ
दारान्प्रार्थ्यांश्रियंसुरवरैः सदयावलोकान् नैच्छन्नृपस्तदुचितंमहतांमधुद्विट् सेवानुरक्तमनसा
मभवोपिफल्गुः ४५ ॥

४४ दुस्त्यजत्वेहेतुः हृदिस्पृशः मनोज्ञान् त्यागेहेतुः उत्तमस्लोकेलालेपरत्वंयस्य ४५ तस्यैवं विषयत्यागो
नचित्रमित्याह यएवंभूतोसोनृपः सद्दितादीन् नैच्छदिति यत्तदुचितं सदयावलो
कोयस्याइतिपरिजनावलोकः श्रियामपवर्ग्यने यतः मधुद्वि
षः सेवायामनुरक्तमनोयेषांमहतां अभवोमोक्षो
पिफल्गुः तुच्छः ४५ ॥

तस्यासेवानुरागमेवाह यज्ञायेति यज्ञाय धर्मपतये यज्ञादिफलदात्रे विधौ नैपुण्यं यस्य तस्मै धर्मात्रमहात्रेयोगोहां
गः तस्मै सांख्यस्यानेन क्रियः यथा नेफलं यस्य तस्मै योगाय प्रकृतीश्वराय मायानियंत्रे अत एव नारं जीवसमूहः
स एवायनमाश्रयो यस्य सर्वजीवनियंत्रे एवं वंशे ज्ञानदेवतनाकोडैः प्रतिपादिताय हरये नमः इति उद्गारमुच्चार्य
सम्यगुच्चारितवान् मृगत्वे मृगदेहमपरिहास्यन् यएवंभूतः तस्य तदुचितमिति वा तस्यानुवर्त्मना हृत्तीतिसं

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय नारायणाय हरये नम इत्युदारं
हास्यन्मृगत्वमपि यः समुदाजहार ४५ इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरत
स्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति च सर्वा
एवाशिष आत्मन आशास्ते न कांचन परत इति ४६ इति श्रीभागवते महापुराणे पंचमस्कंधे
भरतोपाख्याने वासणरहूगणसंवादे चतुर्दशोऽध्यायः १४ ॥

वंधः ४६ भरतचरितश्रवणादिफलमाह इदमिति भागवतैः सभाजिता अवदाताः शुद्धा गुणाः कर्माणि
च यस्य तस्य भरतस्यानुचरितं यो नु शृणोति स आत्मन एव सकाशात् सर्वा आशिष आशास्ते स्वत एव प्राप्नो
ति न तु कांचिदपि परस्मादपेक्षत इत्यर्थः ४६ इति श्रीभावार्थदीपिकायां पंच
मस्कंधे चतुर्दशोऽध्यायः १४ एवमष्टभिरध्यायैर्भरतस्योक्तमीहितं
ततः पंचदशे तस्य कीर्त्यते वंशजानुगाः ॥ ॥

ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानं यं बुद्धोऽतिशेषः यद्वा ये सुमतिमवेदसमाम्नातां देवतां गोस्वनीसदा
जिन इति संज्ञां कलौ कल्पयिष्यन्ति बुद्धोऽयं साक्षाद्देवतात्मा इति मे सेवनेरत्यर्थः १ तत्तनयः देवताजितः पुत्रः ३
आत्मविद्यां बहुभ्य आख्याय आख्यानेनैव स्वयं संशुद्धो संस्मार अपरोक्षतया अनुस्मृतवान् प्रतिहर्ताप्रस्तोतोद्गाता

शुक उवाच भरतस्यात्मजः सुमतिर्नामाभिहितो यमुह वाव केचित्पाखण्डिन ऋषभपदवीमनु
वर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति १ तस्माद्वृद्ध
सेनायां देवताजिन्नाम पुत्रोऽभवत् २ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य
सुवर्चलायां प्रतीह उपजातः ३ य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ४ प्रती
हात्सुवर्चलायां प्रतिहर्त्रादयः त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजा
निषातां ५ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आ
सीद्विभुः विभो रत्यां च पृथुषेणः तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राज
र्षिप्रवर उदारश्रवाः अजायत साक्षाद्भगवतो विष्णोर्जग
द्रिरक्षिषया गृहीतसत्त्वकलात्मवत्त्वा
दिलक्षणेन महापुरुष
तां प्राप्तः ५

ब्रह्मेति त्रयो यज्ञे निपुणाः सूनव आसन् अजनिषातां जातौ च हृदयजः पुत्र जगतो रिरक्षिषया गृहीतं सत्त्वं ये
न तस्य विष्णोः कलांशः सन् ५ ॥

श्री॰
भा॰पं॰
टी॰
४॰

महापुरुषत्वमाह सवै इति धर्मः तस्य द्विविधः अभिषिक्तत्वात् प्रजापालनादिरेकः गृहस्थत्वादिज्यादिश्चापर
द्विविधोपि भगवति सर्वात्मनार्पितः सन् परमार्थलक्षणः तेन परिभाविता संस्कृता अतिशुद्धा मतिर्यस्य अतएवोप
रतनानात्वं देहाद्यहंभावो यस्मिन् यस्मिन्नात्मनि विविक्ते स्वयमेवोपलभ्यमाने ब्रह्मण्यात्मानुभवो यस्य तादृशो
पि निरभिमान एव अवनिं अजूगुपत् पालयामास ६ कर्मभिः गयेकः प्रतियाति अनुकरोति न कोपि अत्र हेतुः

सवै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापु
रुषे परे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन
चाभीक्ष्णशः परिभाविताति शुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवो
पि निरभिः मान एवावनिमजूगुपत् तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति ७ गयं नृपः कः
प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता समागतश्रीः सदसस्पतिः सतां सत्सेवकोन्यो भ
गवत्कलामृते ८ यमभ्यषिंचन् परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः यस्य प्रजानां
दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ९

यज्ञादिरूपो भगवान् कलां गयमृते अन्यः कइममनुषेताः अभिमानः सर्वतो मानस्य हेतुः मनस्वी निवा समागता संपत्
श्रीर्येन तमिति वा सतां सदसः सभायाः पतिः सतां सेवकः यद्वा यज्ञादिरूपोपि भगवत्कलामृते गयं कोन्यः अप्रत
यातीत्यन्वयः ८ सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयेत्याद्याः नि
राशिषोपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे तस्य गुणा एव वत्सः तेन स्नुतं स्नुयो
यस्याः दक्षिणायाः यज्ञदानां तेगयेकः प्रतियातीति संबंधः ९ ॥ ॥

राम॰
४॰

ॐ दांसि वेदाः नहि हि न कर्माणि वाडृतु हृः ऋतुकृः युधिष्ठिरं विना वाणैः प्रतिष्ठजिनानृपाः यस्य बलिमा
जहुः धर्मेण पालनेन दक्षिणादिभिश्च यद्राशवं विना विप्राः न दायरत्तलोकान्तरेष्वाशिषो धर्मफलानां षष्ठमं
शुभाजहुः ७ एवं यज्ञागमादन्ने न्यायेन परिपालयत्रि नितिस्पने ४ ८ डरा सोमपीथे बहु सोमपनिर्धरमेवोनिदंडे
मायतिमर्दशाम्मवति मतिश्रद्धयाविशुद्धायावलोभक्तियोगः तेन समर्पितमित्याफलंश्राजहार श्रद्धेणामिवश

ॐ दांसकामस्य चयस्य कामाद्दहृतुराजहुर यो वलिंनृपाः धर्मं विनायुधिर्धर्मेण विप्राय दाशि
षोषष्ठमंशे परेत्य ४ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्युम्र रुसोमपीथे श्रद्धाविशुद्धाचलभ
क्तियोग समर्पितेज्याफलमाजहार ९ यत्प्रीणनात्वर्हिषिदेवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात्
प्रीयेत सद्यः सह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य १० गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन
इति त्रयः पुत्रा बभूवुः चित्ररथादूर्णायां सम्राडजनिष्ट ११ ततउत्कलायां मरीचिर्मरीचेर्विंदुमत्यां विं
दुमानुदपद्यत तस्मात्सरघायां मधुनामाभवत् मघोः सुमनसि वीरव्रतः ततो भोजायां मंथुप्रमंथू जज्ञाते
मंथोः सत्यायां भौवनः ततो नेदूषणायां त्वष्टाजनिष्ट त्वष्टुर्विरोचनायां विरजः विरजस्य शतजित्
प्रवरं पुत्रशतं कन्या च विषूच्यां किल जाते १३ तत्रायं श्लोकः प्रैयव्रतं वंशमिमं विरजश्चर
मोद्भवः अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा १४ इतिश्री गवते चमस्कं पंचदशो
ध्यायः १५ ॥

यद्वतः स्वीकृतवानित्यर्थः ९ यस्य भगवतः प्रीणनादेवानां हेदैवं तत्सद्यः प्रीयेत प्रीतिं गच्छेत् सविश्व
जीवः सर्वान्तर्यामी स्वयं प्रीतिरूपएव वर्हिषियज्ञे गयस्य हस्तादंप्रीतिमगात् स्मास्मीतिप्रत्यदं प्रीतिमाविः कृतवानि
त्यर्थः १० ११ सुमनसि स्त्रियां १३ कीर्त्याश्रतिशयेनस्रलमकरोत् भूषितवान् १४ इतिश्री वार्थ पिका
यां पंच स्कंधे पंचदशोध्यायः १५ राम राम ॥ ॥

पूर्वोक्तद्वीपसिंध्वादिमानंकृत्स्नस्वरूपतः स्फुटंषोडशमारभ्यापंचाध्यायीततः परं षोडशोथस्मयाचोर्ध्वपरितःस
न्निवेशतः भुवः स्थितिर्महीपंकजकर्णिकाचोपवर्णिता प्रियव्रतचरित्रोक्ता उक्ताद्वीपादिकल्पना नहिशेषवि
जिज्ञासुः कथंतेपरिहृत्य इतिउक्तं इतिकिंपर्यंतमुक्तं स्मरन्नाह यावदादित्यस्तपति यत्रवासौज्योतिश्चक्रंलपदृयोन

राजोवाच उक्तस्त्वयाभूमंडलायामविशेषोयावदादित्यस्तपतियत्रचासौज्योतिषांगणैश्चंद्रमावासह
दृश्यते १ तत्रापिप्रियव्रतरथचरणपरिखातैः सप्तभिः सप्तसिंधवः उपक्लृप्ताः यतएतस्याःसप्त
द्वीपविकल्पस्त्वयाभगवन्खलुसूचितः एतदेवाखिलमहंमानतोलक्षणतश्चसर्वंविजिज्ञासामि २
भगवतोगुणमयेस्थूलरूपआवेशितंमनोह्यगुणेपिसूक्ष्मतमआत्मज्योतिषिपरेब्रह्मणिभगवतिवा
सुदेवाख्येक्षममावेशितुंतदुहैतत् गुरोर्हस्यनुवर्णयितुमिति ३ ऋषिरुवाच नवैमहाराजभगव
तोमायागुणविभूतेः काष्ठांमनसावचसावाधिगंतुमलंविबुधायुषापिपुरुषः तस्मात्प्राधान्येनैवभू
गोलकविशेषंनामरूपमानलक्षणतोव्याख्यास्यामः ४ योवायंद्वीपः कुवलयकमलकोशाभ्यंतरकोशोनियु
तयोजनविशालः समवर्तुलोयथापुष्करपत्रं ५ ॥

नक्षत्रगणैः सहचंद्रमावादृश्यतेतावत् १ यतः येभ्यःसिंधुभ्यः तस्याभुवः सूचितः संक्षेपतोदर्शितः २
जिज्ञासायाः फलमाह भगवत इति ३ यामायागुणविभूतिः तस्याः काष्ठामंतेस्वरूपेसंनिवेशः लक्षणंचिह्नं
४ कुवलयंभूमंडलंतदेवकमलंतस्यकोशाः सप्तद्वीपाः तेष्वभ्यंतरः कोशः प्रथमोजंबूद्वीपः
नियुतयोजनविशालः लक्षयोजनविस्तीर्णः ५ ॥ ॥

नवयोजनसहस्रमायामो येषां आयामोऽत्र विस्तारः एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं तयोरेकत्रिंशद्यो
जनसहस्रायामत्वात् किंचिन्नीलनिषधयोः संलग्नाग्रयोः समप्रदेशमध्ये ह्येतयोरपि मध्ये संकुचितत्वेन न
वसहस्रायामत्वं संपादयंति संनिवेशश्च वायुनोक्तः येऽत्रवर्षसंस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे दीर्घाणि तत्र चत्वारि
चतुरस्रमिलावृतं ८ नाभ्यां मध्ये द्वीपायामो लक्षयोजनप्रमाणस्तावान् समुन्नाहः उच्छ्रायो यस्य ॰ मूले षोडशयोजन

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति ६ एषांम
ध्ये इलावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमु
न्नाहः कर्णिकाभूतः कुवलयकमलस्य ॰ मूर्धनि द्वात्रिंशत्सहस्रयोजनवितितो मूले षोडशसा
हस्रं तावतांतर्भूम्यां प्रविष्टः उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकु
रूणां वर्षाणां मर्यादागिरयः प्रागायताः उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्व
स्मात् पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसंति ८ ॥ ॥

सहस्रं चितं ततं तावता षोडशयोजनसहस्रमानेन चतुरशीतिसहस्रमानेन च बहिर्दृश्यते एवं लक्षयोजनोन्ना
हः एवमुत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः क्षारोद एवावधि
र्येषां द्विसहस्रयोजनविस्तीर्णाः दशांशादधिको योंऽशः तेन दैर्घ्य एव ह्रसंति न तूच्चत्वे पृथुत्वे वा यथोक्तं वि
ष्णुपुराणे लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे इति एतच्च स्थूलदृष्ट्योक्तं तयोरपि यथावन्मध्यमा
त्वाभावेन लक्षप्रमाणत्वाभावात् ८ ॥

श्री॰
भा॰ पं॰
टी॰
५५

अयुतयोजन उत्सेधः उच्छ्रायो येषां प्रथयं चोत्सेधः नीलादीनामपि ह्रस्वाः नीलादिष्वप्युत्तरेषामपि ह्रस्वत्वं यथासं
ख्यं मर्यादागिरय इति शेषः ७ आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ पप्रथतुः
विस्तीर्णौ भवतः ८ तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं विदधाते कुर्वाते नन्वेवं सति पूर्वापरयोरायामि
त्वादिलावृतवेष्टितो मेरुर्मध्ये न ततः पूर्वापरतो गिरिद्वये द्वये च नातः किं विशेषाद्दक्षिणोत्तरयोरेवायामो न तथैवेलावृतवेष्टि
तो मध्ये मेरुरुभयेन त्रीणि वर्षाणि गिरयश्च तत्वात् सर्वमेतल्लक्षप्रमाणे जंबूद्वीपस्योच्यते मेरोः षोडशसहस्रा
णि सर्वतः स्थितत्वात् इलावृतस्याप्यष्टादश अन्येषां षण्णां चतुः पंचाशत् गिरीणां षण्णां द्वादश इत्येवं

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादय अयुतयोजनोत्सेधा ह
रिवर्षकिंपुरुषभारतानां यथासंख्यं ९ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावा
नीलनिषधायतौ द्विसहस्रं पप्रथतुः १० केतुमालभद्राश्वयोः सीमानं विदधाते ११ मंदरो मेरुमं
दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरय उपक्लृप्ताः १२
चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाः चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्ताव
द्विटपविततयः शतयोजनपरिणाहाः १३ ॥

दक्षिणोत्तरयोरायाममपि तावल्लक्षप्रमाणं पूर्वापरयोरायाममपि समेरोरिलावृतस्यापि चतुस्त्रिंशत् गिर्योः चत्वारि शे
षाणां द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्यह्रस्वानि अतो न विरोधः अयुतयोजनप्रमाणो विस्तारोन्ना
हो येषां विस्तीर्णास्तु ऊर्ध्वं मेरोरवष्टंभात् पूर्वपश्चिमयोर्गिर्योः दक्षिणोत्तरविस्तारो दक्षिणोत्तरयोश्च पूर्वापरविस्ता
रो द्रष्टव्यः सर्वतो दशयोजनसहस्रविस्तारोन्नाहात्वे इलावृतलोपात् पूर्वेणेलावृत उपसावयतीत्यादि विरोधः १२
अधिसहस्रमेकादशशतानि उन्नाहो येषां शतयोजनपरिणाहो येषां तावत्प्रमाणा विटपवितति येषां १३ ॥ ॥

राम॰
५५

यदुपस्पर्शिनः यत्सेविनः १४ ललामो भूषणं सुरललनानां भूषणभूताः श्रेष्ठा याः स्त्रियः तासां यूथपतयः स
ह संभूय येषु विहरंति १६ एकादशशतयोजनमुत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणं च
तत्वाद्गुरुत्वात् अरत्नीनां शतान्यष्टौ पंचाशदधिकानि फलप्रमाणमाख्यातमृषिभिः तत्त्वदर्शिभिरिति १७ अ

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भर
तर्षभ धारयंति १४ देवोद्यानानि च भांति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति १५ येष्व
मरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति
१६ मंदरोत्संग एकादशशतयोजनोत्तुंगाद्देवचूतशिरसो गिरिशिखरस्थूलान्यमृतकल्पानि
पतंति १७ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणरसोदेनारुणोदा नाम नदी मं
दरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति १८ यदुपजोषणाद्भवान्या अनुचरीणां पुण्य
जनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति १९ एवं जंबूफलानाम
त्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबू नाम नदी मेरुमंदरशिख
रादयुताधिकयोजनादवनीतले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदयति २० ॥ ॥

तिमधुरस्य सौरभ्येन सुरभिः सुरगंधिः सुगंधिस्तैः तेषां गंधैरभिवासितः बहुलश्चारुणश्च रसः स एव उदकं तेन
१८ यदुपजोषणात् यस्य रसस्य सेवनात् १९ अनस्थिप्रायाणाम् अतिसूक्ष्मबीजानां अत्युच्चनिपतनात् तत्रास्मात्
त्मनो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः २१

तावत्सर्वतः शोधसोः नद्योः २१ २२ आयामोत्र व्यासः सच व्यामो बाह्वोः मकरयोस्तिर्यग्गतनरमित्युक्तलक्षणः
पंचव्यामपरिणाहः स्थौल्यं यामायामिनवर्धैः केचित्तु पंचव्यामपरिणाह इत्येव पठंति २३ २४ नीचीनाग्रयोग
त्वाः २५ वनदिदलमेरुमूलाद्योजनसहस्रेणस्कन्धाग्रैः परितः सरिथ यस्य जठरदेवकूटादयः तिष्ठंति अनोष्ठा

तावदुभयोरपिरोधसोर्यामृत्तिकारसेनानुविध्यमानावाय्वर्कसंयोगविपाकेनसदामरलोकाभरणं
जांबूनदंनामसुवर्णंभवति २१ यदुहवावविबुधादयः सहयुवतिभिर्मुकुटकटकटिसूत्राद्याभर
णरूपेणखिलधारयंति २२ यस्तुमहाकदंबः सुपार्श्वनिरूढस्तस्यकोटरेभ्योविनिःसृताःपं
चायामपरिणाहाः पंचमधुधाराः सुपार्श्वशिखरात् पतंत्योपरेणात्मानिमिलाहतमनुमो
दयंति २३ यास्त्वुपयुंजानानांमुखनिर्वासितोवायुःसमंतात् शतयोजनमनुवासयति २४
एवंकुमुदनिरूढोयः शतवल्शोनामवटः तस्यस्कंधेभ्योनीचीनाः पयोदधिमधुघृतगुडा
न्नाद्यंवरशय्यासनाभरणादयः सर्वएवकामदुघानदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृत
मुपयोजयंति २५ यानुपजुषाणानांनकदाचिदपिप्रजानांवलिपलितक्लम
स्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषाभवंति यावज्जीवंसुखं
निरतिशयमेव २६ कुरंगकुरंगकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनीवासकपि
लशंखवैदूर्यजारुधिहंसऋषभनागकालंजरनारदयोविंशतिगिरयोमेरोः कर्णिकायाइवकें
सरभूतामूलदेशेपरितउपक्लृप्ताः २७ जठरदेवकूटौमेरुंपूर्वेणाष्टादशयोजनसहस्रमुदगायतौ
द्विसाहस्रंपृथुतुंगौभवतः एवमपरेणपवनपारियात्रौदक्षिणेनकैलासकरवीरौप्रागायतौ
एवमुत्तरतः त्रिशृंगमकरावष्टभिरेतैः परिसृतोग्निरिवपरितः चकास्तिकांचनगिरिः २८

दशयोजनसहस्रंप्रमाणमन्योन्यंवैलवादिक्षणेनस्यपरिमाणदिमित्युनःअन्यथावर्णितनन्नवलामेदाग
पंचदयादिसहस्रंपृथूच्चतंगोच २८ ।।

यथादिशंप्राच्यादिदिक्षुः यथारूपंइंद्रादिवर्णानु अनुक्रमेणतुरीयमानेनसार्द्धद्विसहस्रप्रमाणेननामा
निपुराणांतरात् ज्ञातव्यानियथोक्तंमेरौनवपुराणिस्युर्मनोवत्यमरावतीतेजोवतीसंयमनीतथाकृष्णांगनापरा
श्रद्धावतीगंधवतीतथाचान्यामहोदया यशोवतीचब्रह्मेंद्रवह्न्यादीनांयथाक्रममिति ३० इतिश्रीभावार्थो
पेपंचमस्कंधेषोडशोध्यायः १६ ततःसप्तदशेगंगागमनंतच्चतुर्दिशम् इलावृतेचरुद्रोऽसंकर्षणंनिषेवणं
यज्ञलिंगस्यबलेर्यज्ञेलिंगानित्रिविक्रमस्यकीर्तयेस्य विक्रमतः दक्षिणेनपदाभुवंक्रांत्वावामपदमुत्क्षिपतः वामपादां

मेरोर्मूर्द्धनिभगवतआत्मयोनेर्मध्यउपक्लृप्तांपुरीमयुतयोजनसाहस्रींसमचतुरस्रांशातकौं
भींवदंति २९ तामनुपरितोलोकपालानामष्टानांयथादिशंयथारूपंतुरीयमानेनपुरोष्टावुप
क्लृप्ताः ३० इतिश्रीभागवतेपंचमस्कंधेभुवनकोशवर्णनेनामषोडशः १६ शुकउवाच तत्रभ
गवतःसाक्षाद्यज्ञलिंगस्यविष्णोर्विक्रमतोवामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतः
प्रविष्टायाबाह्यजलधारातच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलाप
होपस्पर्शनामलासाक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानातिमहताकालेनयुगस
हस्रोपलक्षणेनदिवोमूर्धन्यवततार १ ॥ ॥

गुष्ठनखेनैवाभिनिर्भिन्नमूर्ध्वमुपरिभागोयस्याण्डकटाहस्यतस्यविवरेणांतःप्रविष्टायाबाह्यजलधारा सादिवोमूर्ध
न्यवततारेत्यन्वयः तस्ययच्चरणपंकजंतस्यावनेजनेनक्षालनेनारुणैःकुंकुमैस्तदेवकिंजल्काः तैरुपरंजिता
अतएवाखिलस्यजगतोघमलापहमुपस्पर्शनंयस्याः तथाप्यमलानतुमलसंसृष्टा साक्षाद्भगवत्पदीति
यदनुपलक्षितंजाह्नवीभागीरथीत्याद्युपलक्षणांतररहितंचवचोनामतेनाभिधीयमानातस्मिन्समयेभगव
त्पदीतिनामपश्चान्नामांतराणिजातानि १ ॥ ॥

श्री· भा·पं· टी· ५१

कोसौदिवोमूर्धानमाहृयदिति किंतद्विष्णुपदंतदाहयत्रेतिवीरव्रतः इहसेकल्पः अस्मात्कुलदेवतायाहरेश्चरा
णारविंदोदकमितिहेतोः परमादरेणबिभर्तीत्यन्वयः कथंभूतेसन् अनिशंवर्धमानेनभगवद्भक्तियोगेनदृ
ढमत्यंतंक्लिद्यमानमंतर्हृदयंयस्यअतएवऔत्कंठ्येनविवशामामीलितेयल्लोचनयुगलंतदेवकुड्मलंतेनाभ्यांविगलि
तममलंबाष्पंतस्यकलयासहअभिव्यज्यमानेरोमपुलकानांकुलंयस्य २ ततः सप्तर्षयः तस्यागंगायाः प्रभावा
भिज्ञाः संतः यांजटाजूटैरुद्वहंतीत्यन्वयः एतावत्येवतपसोधिकासिद्धिरित्यभिप्रायवंतः तत्रहेतुः भगवतिसंततभा

यत्रहविष्णुपदमाहुः यत्रहवाववीरव्रतऔत्तानपादिः परमभागवतोस्मत्कुलदेवताचरणारविंदोद
कमितियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानोंतर्हृदयऔत्कंठ्यविवशामीलि
तलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोधुनापिपरमाद
वेशो गतिमान्द्यं तेनोत्तरदिनवृद्धिः रात्रिह्रासश्च दक्षिणायने च पाशद्वयाकर्षणेन रथस्यारोहितो बहिर्मंडल
प्रवेशो गतिशैघ्र्यं चेति अहोरात्रयोर्विपर्ययः वैषुवते च पाशसाम्यात् समावस्थानं मंडलप्रवेशो गतिसाम्यं च
अहोरात्रयोः साम्यमिति यथा वायुपुराणे तत्र आकर्षणे यदा तौ तु ध्रुवेण समधिष्ठितौ तदाभ्यन्तरतः सूर्यो
भ्रमते मंडलानि तु ध्रुवेण मुच्यमानेन तु नारश्मियुगेन तु तदैव निवाह्यतः सूर्यो भ्रमते मंडलानि चेति तदेवं उक्तं
यदा मेषतुलयोरित्यादिना २ उदयास्तादिकं तत्त्वमाह तस्मिन्स्थाने सोऽत्र मेरोः पूर्वतः पुरी उपदिशन्ति
सर्वत्रैषु यः नास्तं उत्तरी उदयादीन्मनुपदिशन्ति चतुर्दिक्षु मितेन्द्रयमेरोः दक्षिणदेशे तेषामेव पुरीमारभ्य
ओदयः येषां स्थिमेते वा यामास्याः नक्षत्राणां मेरुस्थानां सव्येनेति तद्दिशमभिमुखं तथा खगानां मेरुवासि

नक्षत्राणां उदितं समर्थं गतं एव सदा दक्षिणमपतिसव्ये
नावलंदक्षिणेन करोति ८ राम ॥

नः ऊर्ध्वतः पिशदक्षिणावर्तव्यवहारात् स्ववायुभ्राम्यमाणज्योतिश्चक्रवशात् प्रत्यहं दक्षिणतः करोति
अतः चक्रगतिवशात् दिनेऽह्न्यतो नोर्ध्वं संलग्नं सर्वदर्शनं उदयः आकाशमार्गं सा सव दर्शने मध्याह्नः भूमिं प्रविष्ट
स्येवादर्शनमस्तमयः ततोऽतीव दूरगमने निशीथ इति सूर्य इतीरस्य सदृशा एव दिशास्व शेषास्तथा मध्ये
यदि विदिशास्वव सूर्योवाप्यक्षाग्रतः रुद्रत्वपः सायं प्रविशतीति भ्रान्तिव्यवहारेण वस्तुतः तत्त्वे सर्वे
उदयास्तमये चैव सर्वकालं तेन सम्भवे २ येषां यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः तिरोभावं च यत्रैति तत्र
चैवास्तमने रवेः नैवास्तमनमर्कस्य नोदयः सर्वदा मतः उदयास्तमनाख्यं हि दर्शनादर्शने रवेः शाक्रा
दीनां पुरे तिष्ठन्स्पृशत्येष पुरत्रयं विकर्णौ द्वौ विकर्णस्थस्त्रीन्काष्ठान्द्वे पुरे तथेति अत एव तत्रैवोक्तं स
र्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित इति यतो यत्रवयः पश्यति सैव तस्य वामतो मेरुस्तिष्ठतीति ८ ॥ ॥

यथोक्तमुदयास्तमनाद्याह नैयमेंद्रपुरीं याति यत्रोदेतीत्यादिना ४ स्पंदेन स्वेयोक्तमनेन प्रस्वापयति निशीथं करोति
येनैव समनुपश्येरन् प्रस्वापयति समानसूत्रस्थाः १० साधिकानि पंचविंशति सहस्राधिकानि ११ सहैवायसहे
वयघाथिवस्वतः सूर्यस्याधिनत्वेः सहैवादयास्तमयौ तथापि तस्यान्नसाहित्यादर्शनात्सोमादीनामेव तत्साहि
त्यमुक्तं १२ त्रयीमयस्य तस्याशुपासनार्थं १३ द्वादशमासात्मकस्य षट् ऋतवो नेमयो यस्य त्रीणि चातुर्मास्या
नि नाभयो यस्य कृतं इतरभागो यस्य मानसोत्तरगिरौ लग्ना द्वितीयपरिवायुवद्रश्माविनि द्दृब्वं चक्रं वातात्

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति ८ तत्रत्यान्वन स्पंदेनाभितपति तस्य हैष समान
सूत्रनिपाते प्रस्वापयति तत्रगतं न पश्यंति ये तं समनुपश्येरन् ९ यदा चैंद्र्याः पुर्याः प्रचलते पं
चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्धद्वादशलक्षाणि साधिकानि चोपयाति
१० एवं ततो वारुणीं सौम्यां ऐंद्रीं च पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्यु
द्यंति सह वा निम्लोचंति ११ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौ
रो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु १२ यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्स
रात्मकं समामनंति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तै
लयंत्रचक्रवत् भ्रमन्मानसोत्तरगिरौ परिभ्रमति १४ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन सं
मितस्तैलयंत्राक्षवत् ध्रुवे कृतोपरिभागः १५ ॥

कृतेतरमिति मंतव्यं अन्यथाऽनुमानसोत्तरस्य मेरोः चतुरशीतिसहस्रोच्छ्रायत्वात् दृष्टस्य साम्यानुपपत्तेः
१४ तस्मिन्नक्षे चक्रेण तेन कृतमूलः निबद्धपूर्वभागः प्रथमाक्षो मेरुमानसोत्तरायतः सार्धसप्तलक्षाधिक
सार्धकोटिप्रमाणः तस्य तुर्यमानेन तत्सार्धसप्तत्रिंशल्लक्षसहस्राधिकैकोनचत्वारिंशल्लक्षाणां मानेन ध्रुवे कृतः
वायुपाशेन नद्धउपरिभागो यस्य १५ ॥

श्री० भा० पं० टी० ९०

नीडुपवेशनस्थानं गायत्र्यादिच्छंदोनामानः अरुणेन योजिताः सप्त देवं वहंति १६ पुरस्तादिति यतोपि पुरस्तात्
तं पुरस्तादासीनस्य यद्दायवत्स्थितं पुरस्तात् स एव पश्चिमत्वात् तस्मादिन्नं अग्रस्थस्य स्थाने च व्यवस्थितो नं समास्त्र रूपच्छंदासिव
हे ने वामतो रविं वक्र पदानि वक्त्राणि वक्रे वाससः समाहित इति १७ सूक्तवाकाय स्तुभाषितानाय १८ एकैकशः
चतुर्दशाहे हस्पाः सप्तगणाः सेनो मासमासि मासि उपासत इत्यन्वयः १९ गव्यूतिः क्रोशद्वयं सगव्यूत्युत्तरं यथाम

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छंदो-
नामानः सप्तारुणयोजिता वहंति देवमादित्यं १६ पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये
कर्मणि किलास्ते १७ तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं
सूक्तवाकाय नियुक्ताः संस्तुवंति १८ तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्ये-
कैकशो गणाः सप्त चतुर्दश मासि मासि भगवंतं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वंद्व-
श उपासते १९ लक्षोत्तरं सार्धनवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्वि-
सहस्रयोजनानि स भुंक्ते २० इति श्रीभागवते पंचमस्कंधे एकविंशोऽध्यायः २१ राजोवाच यदे-
तद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रद-
क्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति १ स होवाच यथा कुलालचक्रेण भ्रमता
सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वात् एवं नक्ष-
त्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदा-

वानंतया २० इति श्रीभावार्थदीपिकायां पंचमे एकविंशोऽध्यायः २१ द्वाविंशे सोमशुक्रादेः स्थानमाहा
मरेमम् ततश्च लक्षसारेणाद्रह्मानिष्ठेन यात्रा रवी राशीनामभिमुखं प्रदक्षिणा च उपवर्णितं सव्येन चलन
दक्षिणेन करोतीति वदिना अमुष्य वयं कथमनुमिमीमहि एतत्कथं ज्ञास्यामो विरुद्धत्वादित्यर्थः १ चक्रप्रदक्षिणा
स्वतश्चगतिद्वयमविरुद्धमिति परिहारार्थः २॥

राम० ९०

तत्रत्कालनियमेनकर्मणांविशुद्धेः षड्गुणस्यनिमित्तभूतमात्मानंविभज्यविजिज्ञास्यमानः विनर्कोमा
णीय यथोपजोषं यथाकर्मभोगं ऋतुगुणान् शीतोष्णादीन् ३ वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्र
य्यात्र्याम्नातैः कर्मभिरिंद्रादिरूपयोगवितानैश्च ध्यानादिभिरंतर्यामिरूपेण यजंतः ४ सएवस्वगत्यामा
सादिव्यवहारकारणमित्याह सएषलोकानामात्माद्यावापृथिव्योरंतरेणमध्येयन्नभोवलयमेतद्विदेत
समध्येयत्कालचक्रंतद्गतः ५ राशिभिर्मेषादिभिः संज्ञायेषांचैत्रादिसंज्ञास्तचांद्रमासास्तानामासमाह ५

सएषभगवानादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशुद्धि
निमित्तंकविभिरपिचवेदेनविजिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिष्वृतुषु
यथोपजोषमृतुगुणान् विदधाति ३ तमेतमिहपुरुषास्त्रय्याविद्ययावर्णाश्रमाचारानु
पथाउच्चावचैः कर्मभिराम्नातैर्योगवितानैश्चश्रद्धयायजंतोंजसाश्रेयः समधिगच्छंति ४
अथसएषआत्मालोकानांद्यावापृथिव्योरंतरेणनभोवलयस्यकालचक्रगतोद्वादशमासान्
भुंक्ते ५ राशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयंदिवानक्तंचेतिसपादर्क्षद्वयमुपदिशंति
यावताषष्ठमंशंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयवोथचयावतार्धेननभोवीथ्यां
प्रचरतितंकालमयनमाचक्षतेअथचयावन्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकार्त्स्न्येन
सहभुंजीततंकालंसंवत्सरंपरिवत्सरमिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसमा

द्वयंमासइतिचांद्रेणमानेनसपादमहानक्षत्रद्वयंसौरेणदिनावच्छेदेनत्रिंशद्दिनात्मकंमितिपित्र्येणपक्षमेशं
राशिद्वयं ५ ८ मंडलाभ्यांसहभुंजीतसहसूर्यः यदाशुक्लप्रतिपदिसंक्रांतिर्भवति तदासौरचां
द्रयोर्मासयोर्युगपदुपक्रमोभवतिससंवत्सरः ततः सौरमानेनवर्षेषट्दिनान्यधिकानिचांद्रमानेनषट्
न्यूनानीतिद्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावोभवति एवंपंचवर्षाणिगच्छंति तन्मध्येद्वौ
मलमासौभवतः ततः पुनः षष्ठः संवत्सरोभवति तदेवमवांतरभेदेनसंवत्सरादिपंचकंसमामनंति

सोमादीनामपिस्थानं कार्यं चाह एवं चंद्रमा इति अर्कगभस्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यां सपाददिनद्वयेन
८ सर्वेषां जीवनिदानस्यनोपाणाः अन्नमयत्वादमृतमयत्वाच्च सतएवजीवनहेतुत्वाज्जीवश्च ९ तदेवाह एप
षइति १० दक्षिणेनैवनतोन्नतेषोष्टयगन्यागनिरस्तीत्यर्थः कालायनेकालचक्रेउत्तराषाढाश्रवणासे

एवंचंद्रमाअर्कगभस्तिभ्यः उपरिष्टात्तु लक्षयोजनतः उपलभ्यमानोर्कस्यसंवत्सरभुक्तिं पक्षाभ्यां
मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षिभुक्तिमग्रचारीद्रुततरगमनोभुंक्ते ८ अथचापूर्यमाणा
भिश्चकलाभिः अमराणांक्षीयमाणाभिश्चकलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षा
भ्यां वितन्वानः सर्वजीवनिवहप्राणोजीवश्चएकमेकंनक्षत्रंत्रिंशतामुहूर्तैर्भुंक्ते ९ यएषषोड
शकलः पुरुषोभगवान् मनोमयोन्नमयोमृतमयोदेवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां
प्राणाप्यायनशीलत्वात्सर्वमयइतिवर्णयंति १० ततउपरिष्टात्त्रिलक्षयोजनतोनक्षत्राणि
मेरुंदक्षिणेनैवकालायनईश्वरयोजितानिसहाभिजिताष्टाविंशतिः ११ ततउपरि
ष्टादुशनाद्विलक्षयोजनतउपलभ्यतेपुरतः पश्चात्सहैवचार्कस्यशैघ्र्यमांद्यसाम्याभिर्गति
भिरर्कवच्चरति लोकानांनित्यदानुकूलएवप्रायेणवर्षयन् चारेणानुमीयते सवृष्टिविष्ट
भग्रहोपशमनः १२ ॥

याश्चाभिजिन्नक्षत्रेफलविशेषेणाष्टयक् कल्पितंतेनसहतयावष्टाविंशतिः अभिजिन्नामनक्षत्रंउपरिष्टा
दाषाढानांअधस्तात् श्रोणायाइत्यादि ११ पुरतः सूर्येणाभोद्यमानेनक्षत्रेपश्चात् भुंक्ते सहैवअग्रगमा
नेचारेणाक्रमस्थनक्षत्रायतिक्रमेणवृष्टेर्विष्टंभः स्तंभनेयस्मात् ग्रहाणामुपशमइतीतितया १२॥ ॥

तथा बुधो व्याख्यातः पुरस्तः पश्चात्सहैव वा चरतीति किंचिद्विशेषं चाह तत इत्यादिना आग्राशंसतं स्तु वया
ति १२ अथ शंसः तुः स्वस्तु चवः यदि न वक्रेणाभिवर्तते तर्हि त्रिभिः पक्षैः १४ यदि न वक्रः स्यात्तर्हि परि
वत्सरं १५ इति श्रीभा पंच स्कंधे विंशो यः २२ त्रयोविंशे ध्रुवः स्थानं ज्योतिश्चक्रात्स्वयं ततः

उशनसा बुधो व्याख्यातः तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रा
येण शुभकृद्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते १३ अत ऊ
र्ध्वमङ्गारकोपि योजनलक्षद्वितय उपलभ्यमानः त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्द्वाद
शानुभुंक्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोघशंसः १४ तत उपरिष्टाद्द्विलक्षयो
जनान्तरगता भगवान्बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात् प्रा
येणानुकूलो ब्राह्मणकुलस्य १५ तत उपरिष्टात् योजनलक्षद्वयात्प्रतीयमानः शनैश्
चर एकैकस्मिन्राशौ त्रिंशत्त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपर्येति तावद्भि
रनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः १६ तत उत्तरस्मादृषय एकादशलक्षयो
जनान्तर उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं
प्रक्रमन्ति १७ इति श्रीभागवते पंचमस्कंधे द्वाविंशोऽध्यायः २२ शुक उवाच अथ त
स्मात्परतः त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति य
त्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्
भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहा
शिशुमारसंस्थेयाहरेश्चास्थितिरुच्यते यत्तत्प्रसिद्धं विष्णोःपदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः सह
कालमेव युज्येत इति तथा तैर्न सत्कृत्यैः १॥

श्री॰ भाग॰ टी॰ ९६

मेढीस्तंभे यथा नाक्रमणाय पशवो बली ⁀ ⁀ २ कर्मसारथिः सहायो येषां ३ ईश्वराधारत्वात्पतनशंकेव नास्
लीनिबद्धो मनोनरसा हृदूके चिदिति ज्योतिरनीकं ज्योतिश्चक्रं योगधारणायां स्थितमिति शेषः ५ लांगूले

सहि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्य
माणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते यथा मेढीस्तंभ आक्रमणपशवः संयो
जिताः त्रिभिः सवनैर्यथास्थानं मंडलानि चरंति २ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्यो
गेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनोदीर्यमाणा आकल्पान्तं परिचंक्रमंति नभ
सि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते एवं ज्योतिर्गणाः प्रकृतिपुरु
षसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ३ केचिदेतज्ज्योतिरनीकं शिशुमारसं
स्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ४ यस्य पुच्छाग्रेऽवाक्शिरसः कुंडली
भूतदेहस्य ध्रुव उपकल्पितः तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च
कट्यां सप्तर्षयः तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्रा
ण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसंनिवेशस्य पार्श्वयोरु ॥
भयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ५ ॥

अश्वादयो योभीये उदगयनानि श्रभिजरादीनि पुनर्वसंतानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्या
दीनि उत्तराषाढांतानि चतुर्दश पार्श्वे श्रीमद्वारिः जयत ५ ॥

राम॰ ९६

न्देवस्यानविशेषेणाविभज्य दर्शयति पुनर्वसुपुष्यावित्यादिना पुनर्वसू उदगायनान्ते नक्षत्रं पुष्यो दक्षिणायन
स्याद्यं आर्द्राश्लेषे तयोर्निरन्तरे अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोरायन्तनक्षत्रे श्रवणपूर्वाषाढे तयो
रुत्तरपूर्वे धनिष्ठामूलं च तयोरुत्तरपूर्वे मघादीनि यान्यष्टौ तानि दक्षिणायनान्यष्टानि वामपार्श्ववङ्क्रि
षु वामपार्श्वास्थिषु मृगशीर्षादीनि प्रातिलोम्येन पूर्वभाद्रपदान्तानि यान्युदगयननक्षत्राण्यष्टानि दक्षि(

पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योः आर्द्राश्लेषे दक्षिणवामयोः पश्चिमयोः पादयोः अभिजि
दुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासङ्ख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयो
र्धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्व
वङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत
शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ६ उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गा
रकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामु
शना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः
७ एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण
उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ८
ग्रहर्क्षताराभिमयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकाले नमस्यतः स्मरतो वा त्रिकालं नश्येत
तत्कालजमाशु पापं ९ इति श्रीभागवते पञ्चमस्कन्धे त्रयोविंशोऽध्यायः २३

णपार्श्वे शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ६ यमोऽनन्तरः पः नथा नारायणोऽश्विनौ च ककु
दि गलमध्ये पृष्ठे ७ ज्योतिषां लोकायाश्रयाय कालायनाय कालचक्ररूपाय नमो अभिधीमहीति मन्त्रे(
णोपतिष्ठेत ८ मन्त्रकृतां पूर्वोक्तमन्त्रं जपतां ९ इति श्रीभावार्थे पञ्चमस्कन्धे त्रयोविंशोऽध्यायः २३ ॥

श्री°
भा° ५
टी°
२१

एवंत्रिभिर्ध्रुवमर्यादापालनंवर्णितंतथा ध्रुवोभुवनमर्यादापालनंत्रिभिरुच्यते चक्रविशेषरवेर्वा क्रमभान्वादि
स्थितिः क्रमात् श्रमलादिविलस्वर्गमर्यादासमवर्णिताः सूर्यमारभ्य अधोवोतेसंनिवेशानिरूप्येदानींसूर्याद
धस्तात्त्रिरूपयत्यधस्तादिति १ स्वर्भानुः राहुरमरत्वमभलोभोसिंहिकायाः सुतः ग्रहत्वंक्रमाह यददः प्रतपत
स्तरणेर्मंडलंतच्चतपनेमध्यप्रवेशेनतयोर्व्यवधानंकरोतीतितथानयैवनाभ्यांसूचिनत्वाद्वैरमनुबंधानीतित

अधस्तात्सवितुर्योजनायुतेस्वर्भानुर्नक्षत्रवच्चरतीत्येके योसावमरत्वंग्रहत्वंचालभतभगवद
नुकंपयास्वयमसुरापशदः सैंहिकेयोह्यतदर्हः तस्यतातजन्मकर्माणिचोपरिष्टाद्वक्ष्यामः १
यददस्तरणेर्मंडलंप्रतपतस्तद्विस्तरतोयोजनायुतमाचक्षतेद्वादशसहस्रंसोमस्यत्रयोदशस
हस्रंराहोर्यः पर्वणितद्व्यवधानकृद्वैरानुबंधः सूर्यचंद्रमसावभिधावति २ तन्निशम्योभ
यत्रापिभगवतारक्षणायप्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्विषहंमुहुः
परिवर्तमानमभ्यवस्थितोमुहूर्तमुद्विजमानश्चकितहृदयआरादेवनिवर्ततेतदुपरागमितिवद
तिलोकाः ३ ततोधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्रएव ४ ततोधस्ताद्यक्ष
रक्षः पिशाचप्रेतभूतगणानांविहाराजिरमंतरिक्षंयावद्वायुः प्रवातियावन्मेघाउपलभ्यंते
५ ततोधस्ताच्छतयोजनांतरइयंपृथिवीयावद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवराउत्पतंती
ति ६ ॥

या २ भागवतंचक्रंपरिवर्तमानंपरिभ्रमदभितउद्विग्नमुहूर्तमवस्थितः सन् इत्येवमेतद्राहोरवस्थानमुपरा
गंवदंति नतुचंद्रस्यराहुवक्त्रस्थितिरूपामर्धग्रासः सर्वग्रासोनंतग्रासोस्तिहस्तेनतरत्वात् ३ तावन्मात्रेयो
जनायुते ४ अंतरिक्षंहृदीनेतस्यावधिमाह यावद्वायुः प्रवातितीव्रंवातितथोस्तस्याप्यवधिमाह यावा
न्मेघाः ५ पृथिव्याउपरिष्टलोकावधिमाह यावद्धंसादयः पार्थिवाविकाराः ६ ॥ ॥

राम°
२१

योजनायुतांतरेणाधस्तनैकसप्तच्छिद्राः आयामोयः ऊर्द्ध्वकटाहस्तावद्विस्तारेण ७ सामान्येनविवराणिव र्णयतिएतेष्विलादिना अधस्तनलइत्यतः पातालेनेनग्रेचेनएतेषुदैत्यादयोनिवसंतीत्यन्वयः कथंभूतेष्व धिकः कामभोगैश्वर्यानंदस्य विभूतिस्तस्संपत्तिः सुसमृद्धाभवनादयोयेषु कथंभूताः नित्यप्रमुदिताः अनुरक्ताः कलत्रादयोयेषांनप्रतिहतः कामोयेषांमायाविनोदोयेषां ८ किंचहेमहाराजयेषुमये

उपवर्णितंभूमेर्यथासंनिवेशावस्थानेअवनेरप्यधस्तात्सप्तभूविवराः एकैकशोयोजना
युतांतरेणायामविस्तरेणोपक्लृप्ताः अतलंवितलंसुतलंतलातलंमहातलंरसातलंपाताल
मिति ७ एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिः सुसमृद्धभव
नोद्यानक्रीडविहारेषुदैत्यदानवकाद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुच
रागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदानिवसंति ८ येषुमहाराजमयेनमा
याविनाविनिर्मिताः पुरोनानामणिप्रवरप्रवेकविरचितविचित्रभवनप्रा
कारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावत
शुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः
समलंकृताश्चकासंति ९ ॥

नविनिर्मिताः पुरः चकासतिइत्यन्वयः कथंभूताः नानायेमणिप्रवरास्तेषांप्रवेकाः मुख्यास्तैर्विरचितैःवि चित्रैर्भवनादिभिः तथाविवरेश्वराणांगृहोत्तमैश्चसमलंकृताः कीदृशैः गृहोत्तमैः नागाश्चअसुराश्च मिथुनभूताः पारावतादयः चतैराकीर्णाः कृत्रिमभूमयोयेषुतैः पाठांतरेनानास्वन त्वमिथुनेविशेषणं ९ ॥

उद्यानानि वर्त्तन्ते नराममरलोकश्रियमतिशायितानि येषु चक्रामतीत्यन्वयः काभिः स्त्रीभिः कीदृशी कुसुम
फलस्तवकाभ्यस्तभंगकिसलयानि चैतैर्वनतरुविरावितपायेषां विटपिनो लतानामंगैरालिंगितानां स्त्रीभिः
तथा समिथुनावकवाकादिमिथुनसहितायेविविधा वहंगाः तद्युक्तानां जलाशयानां च स्त्रीभिः कीदृशा
नाममलेजलेष्वणानां पुनरपि कीदृशानि रूपकुलोन्मुखनन्दाभिनयजलाशयानानीरंतसिन्

उद्यानानि वानिततरामनइंद्रियानेद्रिभिः कुसुमफलस्तवकस्तभगाकिसलयावनतरुविराविट
पविटपिनोलतांगालिंगितानां स्त्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलस्था
णानां गंधकुलोन्मनद्भिभितनीरनीरजकुमुदकुवलयकल्हारनीलोत्पललोहितशतपत्रादि
वनेषु हृतेनिकेतनानामेव विहाराकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रि
यमतिशायितानि ११ यत्रहवावनभयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते १२ यत्रा
महाहिप्रवरशिरोमणयः सर्वतमः प्रबाधंते नवाएते गुप्तवसनादयोषधिरसरसायनान्नपा
नस्नानादिभिराधयोवलीपलितजरादयश्चदेहवैवर्ण्यदौर्गंध्यस्वेदक्लमम्लानिरिमिवयो
वस्थाश्चनभवंति १३ नहितेषां कल्याणानां प्रभवंति कुतश्चनमृत्युर्विनाभगवत्तेजसश्चक्रा
परेशात् १४

यानिनीरजादीनि तेषां वनेषु कृतं निकेतनं यैः तेषां कुर्याव पक्षिगणोपकोस्वेदोयोविहारस्तेनाकुलाश्चते
मधुराश्च विविधस्वनादयः तेर्येइंद्रियोत्सवाः तैश्च यद्वा समिथुनेत्यादेरुत्तरुणेवसंबंधः म
नइंद्रियानंदिभिरिति स्वनादीनां विशेषणं तत्र नीरजं सामान्येन कमलेलोहितेश्च
तपत्रंतद्विशेषः ११ अहोरात्रादिभिर्यद्भयंतन्नोपलक्ष्यते सूर्याघभा
वात् ११ १२ क्लमः श्रमः म्लानिरुत्साह १३ कल्याणानांमंगलरूपाणां 

यस्मिंभयक्तेजसि प्रविष्टो स्वरवधूनां तु स्रवनानि गर्भाः अथ च तर्थाङ्गवेत्स्रावः पातः पंचमषष्ठयोरिति स्राव
नोज्ञेयो २४ सर्वतोरताः स्वैरिण्यः कामिन्यः तत्सवर्णापितत्राप्यानि चेचलाः पुंश्चल्यः विलायनं विवि
लापनतेन साधयित्वा संभोगसमर्थं कृत्वास्त्रीयायेश्च साधारणाविलासाः तन्त्रुर्वकोवतोकः तेनात्रगणा

यस्मिन्प्रविष्टे स्वरवधूनां तु स्रवनानि भयाद्देव स्रवंतिपतंतीति च २५ अथातलेमयपुत्रो स्वराव
लोनिवसतियेन हवाइह स्वष्टाः षण्णवतिर्मायाः याकाश्चिनायाविमायाविनो धारयंति
यस्यचजृंभमाणस्य स्वरवतः त्रयस्त्रीगणा उद्पद्येत स्वैरिण्यः कामिन्यः पुंश्चल्य इति यावैवि
लायते प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासा नुगगाव लोकनस्मितसंलापोपा
गूहनादिभिः स्वैरंरमयंति यस्मिन्नुपयुक्ते पुरुषः ईश्वरोहंसिद्धोहमिति अयुतमहागजवल
मात्मानमभिमन्यमानः कत्थतेमदांधइव २६ ततोधस्तादितलेहरोभगवान् हाटकेश्व
रः स्वपार्षद्भूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवोभवान्या सह मिथुनीभूतस्त्रास्ते
यतः प्रवृत्ता सरित्प्रवरा हाटकीनाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वनासमिध्यमान
ओजसापिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषी
भिर्धारयंति २७

प्रवेशोस्मिन्निति तेन संलापउपगूहनं च तत्प्राद्यैभिः यस्मिन्नुपसेउपयुक्ते सेविते २८ भवयोर्भवस्यभवा २
न्याश्च चित्रभानुरग्निः तेन निष्ठ्यूतं निरस्तं हाटकं स्वर्णं असुरेंद्राणामवरोधेषु अंतःपुरेषु पुरुषीभिः स्त्रीभिः

स्तनलेबलिरद्युनाप्यास्त इत्यन्वयः कथंभूतः महेंद्रस्य प्रियं कर्तुमिच्छता प्रथमं पराक्रमिमपत्तं त्रैलोक्यं येन
सः पुनर्भगवतो वैकुंठस्यैव तत्र प्रवेशितः स तु कीदृशो वैरोचनिः सकाशान्मृत्वा वटुवामनरूपेण स्तत्यर्थः का
यः तेन १८ कोविन्नस्य स्तनलराज्यैश्वर्ये भूमिदानफलमन्यंते तन्निराकरोति नाप्येतत् दिति यद्बिलनिलयेनि
विरस्याने येऽस्वर्यं पतन्न भूमिदानस्य साक्षात्कारः फलेन भवत्येव कुत इत्यपेक्षायामेवंभूतस्य दानस्य साक्षादप

सिंतनोय स्मात्सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेंद्रस्य प्रियं चि
कीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकंपयैव
पुनः प्रवेशित इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भ
गवंतमाराधनीयमपगतसाध्वस आस्तेऽधुनापि १८ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भग
वत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्र
द्धयापरमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं १९ य
स्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्पुरुषः कर्मबंधनमंजसा वि
धुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभंते २० ॥

वर्गद्वारत्वाह तत्यस्ति द्वारानेतस्यतद्देवाह भगवत्यशेषजीवनिकायानां जीवभूतश्चासौ सर्वजीवनियंता चा
त्मा रामश्चेत्यर्थः तस्मिन्संप्रतिपादितस्य १९ किंच यस्य नामक्षुतनादिषु च विवशोपि सकृदपि गृणन्
कर्मबंधं विधुनाति कथंभूतं यस्य प्रतिबाधनं त्विह मुमुक्षवोऽन्यथैवोपलभंते हमर्थयोगसांख्यादि क्लेशा
नन्नभवंतीत्यर्थः तं कर्मबंधनमंजसि २० ॥ राम ॥

नन्वस्मिं भगवतो भक्तानां स्थानानि तानि च यथा यच्छेदात्मदेहस्य तद्देहं हरौ आत्मानमेव हरये समर्पितं तस्य भूमिदानस्य ता-
त्फलमितिदृष्टं वैरोचनस्येवेथः २१ किंच नेदं भगवद्दत्तं केपापफलमपि किं त्वेकांतभक्तस्यांतरायमात्रमि-
त्याह नविद्गति भगवान् अशेषाश्रमेणैवानुगृहीतवानहं न च हेतवः यद्दत्तेति आत्मन ईश्वरस्यानुस्म-
तिन्दत्स्यांनीतितया नश्वेवात्स्तदेवैमनो यस्य जपहोमार्चनादिषु न स्यांतरायो मैत्रेयदेवैदत्वादिकं फल-
मिति २२ नस्यैकांतभक्तिं सदृशं पचमाह यत्तत्स्वदति प्रसिद्धे इतिवक्ष्यमाणस्यवाचहेत्वर्थः कथंभूतः अन-
धिगतश्च अन्य उपायैर्येन भगवता याञ्चाछलेनाहृते स्वशरीरमात्रावशेषितैलोकत्रयं यस्यसम्यक् प्रतिश्र

तद्भगवतामात्मावतो सर्वेषामात्मन्यात्मद आत्मानमेव २० नावैनद्भगवान्नूनमशेषमात्मश्र-
मग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति २२ यन्न भगवता-
वधिगतमन्योपायेन याञ्चाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रति-
मुक्तो गिरिदर्यां चापविद्ध इति होवाच २३ नूनं बतायं भगवानर्थेषु न निष्णातो योसाविंद्राय
स्य सचिवो मंत्राय वृत एकांतो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचत आत्मना
श्चाशिषो नो एव तद्दास्यमतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं २४

क्तो बद्धः अपविद्धः प्रतिक्षिप्तोपि सन् २३ बतेति खेदे भगवान् विद्वानपि योसाविंद्रः यस्यैकांतेन बृह-
स्पतिः सचिवः सहायः यतो मंत्रार्थे वृतः सोपि पुरुषार्थेषु नूनं न निष्णातः न निपुणः यत उपेंद्रेणाश्र-
यभूतेन उपेंद्रं विहायात्मानं लोकत्रयमयाचत न मे त्वपरं हि हृस्यानि प्रतिहायातिक्रम्येति वा तस्मिन्नु
सत्येपि वरणीयान् लोकत्रयं यतस्तदतितुच्छमित्याह अतिगंभीरमनंतं वयो यस्य तस्य कालस्य यन्म-
न्वंतरं तेन परिहृतं विपर्यस्तं लोकत्रयमिदं कियत् २५ ॥ ॥

श्री॰ भा॰ पं॰ टी॰ ७२

यस्माद्दस्त्वेकएवार्थो निस्तारः इत्याह यस्मादुदास्यमिति स्वपितरि उपरते श्रुते सति स्वं पित्र्यं पदं भगवता
दीयमानमपि भगवतः खलु परमन्यदिति हत्वा नन्दनमग्राहीत्यर्थः २५ तद्गुणमतिवीरः कुतस्तमेव बहुम
त्वा से तत्राह तस्यात्र पथेत्र उज्ज्वलेत्र श्रुतिना गृहीतः कषायारागादयो यस्य परिहीनो भगवदनुग्रहो
यस्य स को वा उपगन्तुमिच्छतीति २६ अथ सुकोक्तिः नन्वेवंभूतः चेद्बलिः तर्हि तस्यैव चरितं विस्तरेण
कथ्यं तातत्राह तस्य बलेरत्र चरितमपरिहार्य दष्टमे विस्तरिष्यते यस्य द्वार्यवतिष्ठते निजजनेषु अनुकंपितो

यस्मात्तुदास्यमेवास्मित्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं प्रदीयमानं भगवतः
परमिति भगवतोपरते खलु स्वपितरि २५ तस्य महानुभावस्यानुपथममृजितकषायः
कोवास्मद्विधः परिहीनभगवदनुग्रह उपजिगमिषतीति २६ अथ तस्यानुचरितमुपरिष्टा
द्विस्तरिष्यते यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते वि
जजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतं दिग्विजय उच्चाटितः २७
ततोधस्तात्तलातले मयो नाम दानवेंद्रः त्रिपुराधिपतिः भगवता पुरारिणा त्रिलोकीशं चि
कीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो वि
गतसुदर्शनभयो महीयते २८ ततोधस्तान्महातले काद्रवेयाणां नैकशिरसां क्रोधवशो ना
म गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पतत्रिराजाधिपतेः पुरुष
वाहादनवरतमुद्विग्नमनसः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति २९

कृतानुकंपित्वं दर्शयन् तस्य द्वारपालकर्म दर्शयति येन श्रीनारायणेन बलेर्द्वारि विवशेन दशकंधर उच्चाटि
तः केन पदा तत्राह अंगुष्ठेनेव २७ यथा हरिणा देवभक्तो बलिस्तथा तलेनिहितः सुखमास्ते एवं महादेवभक्तो
पि मयः तलातले सुखमास्ते इत्याह हतेन ततः इति लब्धं पदं स्थानं येन महीयते पूज्यते २८ नैकशिरसामनेक
फणानां गणो क्षिपन् तत्प्रपंचयति कुहकेति महाभागवंतो महाकायाः पुरुषवाहात् हरेर्वाहनात् २९ ॥ एम॰ ७२

विबुधप्रत्यनीका देवशत्रवः सकलेष्वपि लोकेष्वनुभावो यस्य तस्य हरेः सुदर्शनेन तेजसा प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशयाः सरमाइंद्रदूत्या शप्ताभिर्मंत्ररूपाभिर्वाग्भिः पणयो हि वैदिकमाख्यानेन पणिभिरसुरैर्निगूढं गा आनेतुं सरमा देवशुनी इंद्रेण प्रहिता सा तैर्भिच्छिन्नः शपथमित्यादिना पणयस्तत्कृताद्बिभ्यतीति ३० महाभोगिनो महाफणाः महानमर्षः क्रोधो येषां पंचादिसंख्यानि शीर्षाणि शीर्षाणि येषां

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ३० ततोऽधस्तात्पाताले नागलोकपतयो महाभोगिनो महामर्षा वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ३१ इति श्रीभागवते पंचमस्कंधे चतुर्विंशोऽध्यायः २४ शुक उवाच तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्यातानंत इति सात्वतीया द्रष्टृदृश्ययोः संकर्षणमह

शीर्षाणीति वक्तव्ये शीर्षाणामित्यार्षः ३१ इति श्रीभावार्थदीपिकायां पंचमस्कंधे चतुर्विंशोऽध्यायः २४
पंचविंशे ततोऽधस्तादाह शेषस्य संस्थितं संजिहीर्षोर्हरेः काले यत्र रुद्रः समुद्भवा को वा सनेनः सात्वतीया सात्वततंत्रनिष्ठा चतुर्व्यूहोपासकास्ते यं संकर्षणमित्याचक्षते तेन नामाख्यानेन हेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन तत्कृतमहमिति अभिमानो लक्षणं चिह्नमधिष्ठानं यस्य स्याहंकाराधिष्ठानेन द्रष्टृदृश्यसंकर्षणात्संकर्षणमित्यर्थः १॥ राम राम

श्रीः
भा० ५
टी०
२५

अनंतं वर्णमाह यस्येति यत्र स्थाष्णुनामप एव भगवाननंत इत्युक्तेनान्वयः १ नाम सहस्रमाह यस्येदं विश्वमुपसंहृ
तमिच्छतोऽमर्षेणाविरचितेन विरेकृते कुटिलीकृते भ्रमन्त्यौ भ्रुवौ तयोर्मध्ये उत्तंभयन्नुन्नमयन् ३ स भगवन्माह यस्यां
घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षंडः समूहः तस्य मंडलेषु प्रतिबिंबितानि कुंडलानां प्रभया मंडितानि
गंडस्थलानि येषु तानि ४ वारुण्याः स्रग्वलये विलासिताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भु

यस्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्य
ते २ यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र
एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ३ यस्यांघ्रिकमलयुगलारुणविशदनखमणिषं
डमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलप्रभाम
ण्डितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ४ यस्यैव नागराजकुमार्य आ
शिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरु
चंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मि
तास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति
५ स एव भगवाननंतोऽनंतगुणार्णव आदिदेव उपसंहृता
मर्षरोषवेगो लोकानां स्वस्तय आस्ते ६

ना एव रजतस्तंभास्तेषु अगुरुचंदनकुंकुमानां पंकरूपो योऽनुलेपस्तेनावलिंपमानाः तेषामभिमर्शनेनोन्मथिते हृदये मकरध्व
जस्यावेशेन रुचिरं ललितं च स्मितं यासां ताः तस्यानुरागेण यो मदस्तेन च मुदिते च ते मदेन विघूर्णिते प्रचलिते च ललिते आ
रुणे करुणावलोके युक्ते नयने यस्मिंस्तद्वदनारविंदं विलोकयंति ५ अमर्षोऽसहनं रोषः क्रोधः उपसंहृतस्त
योर्वेगो येन ६ ॥

उपासनार्थमाह सुरादिभिः ध्यायमानः चिंत्यमानः अनवरतं मदेन मुदिते आसौ विहृतविह्वललोचने
यस्य सुललितेन मुखरिकामृतेन वचनामृतेनाप्यायमानः स्वपार्षदान् विबुधयूथपतीन् आप्याययमानः ईषद
न् नीलं वासो यस्य सः हलस्य ककुदि धृते कृतः न्यस्तः सुभगः सुंदरः भुजो येन उदारा लीला यस्य सः नपरि
म्लानो रागः कांतिः यस्याः तस्या नवतुलसिकाया आमोदः मध्वासवेन सुरभिमधुरसेन माद्यतां मधुकराणां
व्राताः तेषां मधुरगीतेन श्रीर्यस्याः तां मालां कक्षावरत्रां ७ संश्लोकयामास सवर्णयामास ८ अस्य जगत
उत्पत्त्यादिहेतवो गुणा यस्येक्षया कल्पाः स्वस्वकार्यसमर्था आसन् यद्रूपं ध्रुवं अनंतमकृतेन अनादित

ध्यायमानः सुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविहृतविह्वललोचनः सु
ललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोद
मध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलक
कुदि कृतसुभगसुंदरभुजो भगवान् महेंद्रो वारणेंद्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ७
य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदय
ग्रंथिं सत्त्वरजस्तमोमयमंतर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वयंभुवो नार
दः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ८ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः
सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन् यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात् कथमु ह वेद त
स्य वर्त्म ९ मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र यल्लीलां मृगपतिरा

मनांस्युदारवीर्यः १०

वेद ज्ञः यदेकमेव सत् आत्मन् आत्मनि नानाकार्यप्रपंचमधात् तस्य त्वत्स्वरूपस्य वर्त्म तत्त्वं जनः कथमु
ह वेद न वेदैवेत्यर्थः ९ तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह मूर्तिमिति यत्र देहे सदसदिदं विभाति सः नोऽस्मा
कं भक्तानां बहुकृपया संशुद्धं सत्त्वं मूर्तिं बभार स्वजनानां मनांस्यादातुं वशीकर्तुं यस्य लीलां मृगपतिः सिं
हः आददे अशिक्षत यतः उदाराणि वीर्याणि यस्य तस्मात् अनंतं शुद्धसत्त्वं कामाद्युपद्रवहिंसनरेणानवद्यः यद्वा
कृपयैव नरहरिः यस्मात् स्वजनमनांस्यादातुं लीलामाददे मृगपतिः सिंहोदारवीर्यः यद्वा अशृण्वत

किंच आस्तां तत्स्वरूपयाथात्म्यधारणं तद्भजनं च तन्नामौदार्यमेवातिविचित्रमित्याह यस्य नाम यदि पतितो नाम
हापातक्यप्यनुकीर्तयेत् नहि संशुद्ध्यादिति किंच वक्तव्यं यतोसावेव नृणामशेषमंहः सद्योहन्ति कथमनु
कीर्तयेत् श्रुतः श्रुतेनैवाथ कस्माद्वा आर्तो वा सन् प्रलंभनाद्वा परिहासात् तस्मात् शेषादन्यं ११
गिर्यादिसहिते भूगोले सत्त्वानि प्राणिनः सहस्रजिह्वोपि को गणयेत् १२ दुरंतवीर्यबहुलेषु उरवो
गुणाः प्रभावाश्च यस्य स च स चरमायाभूमेर्मूले स्थितः निहति आत्मतंत्रः आत्माधारः १३ उक्तालाविः

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा हंत्यंहः सपदि नृणामशेष
मन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ११ मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं समूर्ध्नो भूगोलस
गिरिसरित्समुद्रसत्त्वं आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः
१२ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः मूले रसायाः स्थित आत्मतंत्रो यो ली
लया क्ष्मां स्थितये बिभर्ति १३ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिताः यथो
पदेशमनुवर्णिताः कामान्कामयमानैः १४ एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्म
स्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति १५ इति श्रीभाग
वते पंचमस्कंधे पंचविंशोध्यायः २५ राम ॥

भोगस्योपयोगं वदन्नुपसंहरति एता ह्येवेह कामान्कामयमानैर्नृभिरुपगंतव्या इत्यन्वयः १४ तस्याशेषं वः
एतावतीरेतावत्यः विपाकगतयः फलभूता गतयः ताः व्या
चख्ये व्याख्यातवानस्मि १५ इति श्रीभावार्थदीपि
कायां पंचमस्कंधे पंचविंशतितमोध्यायः २५

षड्विंशे तन्नतीर्यस्मान्नरकस्थितिरुच्यते पापिनो यत्र दण्ड्यन्ते यमदूतैर्यथायथं १ उक्ता गतय उच्चावचा वाति
सदृशा इति भोगवैचित्र्यमुक्तं तदेवं नरकेषु न इति पृच्छति महर्ष इति कर्मणां समानत्वेपि श्रद्धावैचित्र्यमिति
परिहरति त्रिगुणत्वादिति सात्त्विक्याश्रद्धया कर्तुः सात्त्विकराजसत्वेन तामस्याः दुःखत्वेश्रु
ष्टत्वेव तत्रापि तासां श्रद्धानां तारतम्यात् सुखादितारतम्यं सर्वेषामित्यर्थः १ प्रतिषिद्धेत्यनेनेष्टिथः सए

राजोवाच महर्ष एतद्वैचित्र्यं लोकस्य कथमिति श्रीऋषिरुवाच त्रिगुणत्वात्कर्तुः श्रद्धया
कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति १ अथेदानीं प्रतिषिद्धलक्षणस्याध
र्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति या ह्यनाद्यविद्यया कृतकामानां त
त्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्ताः तासां प्राचुर्येणानुवर्णयिष्यामः २ राजोवाच
नरका नाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ३ ऋषिरुवा
च अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्ताद
यः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ४ यत्र ह
वाव भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दो
षमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ५ ॥

वैलक्षण्यं प्रमाणयत्यधर्मस्य कर्तुः श्रद्धावैसादृश्येन मनस्तारतम्यात् तत्रापि कारणं दर्शयन्नाह ह्यनाद्यकृ
तानां कामानां याः सृतयो नरकाः तासां ताः अथेदानीं प्राचुर्येणानुवर्णयिष्याम इत्यन्वयः २ किं भूमा
वेव देशविशेषाः त्रिलोक्या बहिः आहो बहिर्वा आवरणेषु मध्ये अन्तराले वा भूमिस्थानि दिक्षे ३
४ यथाकर्मावद्यं कर्मदोषमनतिक्रम्य दोषमेव दमं पापफलं दण्डं करोति
अनुल्लङ्घितं भगवच्छासनं येन ५ ॥

श्री॰ भा॰ पं॰ टी॰ १९

मनो नरकाणामष्टाविंशतिमाह ८ पापभेदेन तन्नरकयातनाभेदं प्रपंचयति यस्त्विहेत्यादिना यात्यमानाः पी।

तत्र हैके नरकानेकविंशतिं गणयंति अथ तांस्ते राजन्नामरूपलक्षणतोनुक्रमिष्यामः तामि।
स्रोंधतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमि
भोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लाला
भक्षः सारमेयादनमवीचिरयःपानमिति किंच क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दंद
शूकोवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः
८ तत्र यस्त्विह वै परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्ता
मिस्रे नरके बलान्निपात्यते अनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमा।
नो यत्र कश्मलमासादित एकदैव मूर्छामुपयातीति तामिस्रप्राये १ एवमेवांधतामिस्रे
यस्तु वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमति
र्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलः तस्मादंधतामिस्रं तमुपदिशंति २ यस्त्वि
ह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहा
य स्वयमेव तदशुभेन रौरवे निपतति ३ ॥ ॥

मुह्यमानः एकदैव तदैव १ पुरुषं पतिं वंचयित्वा २ एतत् शरीरमहमिति इदं धनादि ममेति मत्वा स्वकुटुंब
मेव पुष्णातीति तेनाशुभेन ३ ॥

रास॰ १९

रुरवो भूत्वा पि तिकर्मणेव न यथा परिणामं प्राप्येत्यर्थः प्राणिद्रुहस्य भार शृंगाद्यस्य सत्वस्यापदेशः संज्ञा यस्य
३. क्रव्येणानिमित्तेन मांसार्थमित्यर्थः ४ प्राणतः सजीवान् उपरंधयति पचति अपकरुणो निःकृपो ५

येत्विह यथैवामुनाविहिंसिता जंतवः परत्र यमयातनामुपगतं तमेव रुरवो भूत्वा यथा तमेव वि
हिंसंति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्वापदेशः ३ एवमेव महारौरवो यत्र निपति
तं पुरुषं क्रव्यादा नाम रुरवः तं क्रव्येण घातयंति यः केवलं देहंभरः ४ यस्त्विह वा उग्रः पशून् प
क्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके
तप्ततैल उपरंधयंति ५ यस्त्विह पितृविप्रब्रह्मध्रुक्स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमं
डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेभिनिवेशितः क्षुत्पिपासाभ्यां च दह्य
मानोंतर्बहिः शरीर आस्ते शेते चेष्टतेवतिष्ठति परिधावति च यावंति पशुरोमाणि ताव
द्वर्षसहस्राणि ६ यस्त्विह वै निजवेदपथादनापद्यपगतः पाखंडं चोपगतः तमसिपत्रव
नं प्रवेश्य कशया प्रहरंति तत्र हासावितस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छि
द्यमानसर्वांगो हा हतोस्मीति परमया वेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पाखंडानुगतं फ
लं भुंक्ते ७ यस्त्विह वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्
नरके सूकरमुखे पतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्व
नयन् क्वचिन्मूर्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ८ ॥ ॥

खले समे देशे ६ स्वधर्महा स्वधर्मत्यागी ७ स्वनयन् रुदन् कश्मलं मोहमुपगतो भवति अदृष्टदोषाः ने
नोपरुद्धाः संतो यथा कश्मलमुपगताः भवंति ८

श्री० भा० पं० टी० ११

ईश्वरेणोपकल्पितामनुष्यरक्षणादिलक्षणावृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैरविवेकिभिः
तेषां पुरुषेण ब्राह्मणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना अभिद्रुह्यता
द्विमिताः विहतानिद्रारूपा निर्वृत्तिर्यस्य न लब्धमवस्थानं येन स तमसि परिक्रामति १७ यत्किंचन भक्ष्यादिकं उपनतं

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्य-
थो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्म-
शकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिर-
लब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः १७ यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतम-
निर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृ-
मिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोनिर्वेशमात्मानं
यातयते १८ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरु-
षस्तममुत्र राजन्यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैः त्वचि निष्कुषंति १९ ॥

प्राप्तं तदसंविभज्य अनिर्मिताः पंचयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः कृमिभोजन कृमीनेव भुंजानः
यावत्तत् तत्र यावंति योजनानि तत्कृमिकुंडं तावंति वर्षाणि यावद्वा तत्पापमित्यर्थः अप्रत्तमसंविभक्तं अप्रहुतं देवाद्यर्पितं तदत्ता
सः अनिर्वेशः अप्रकृतप्रायश्चित्तं १८ निष्कुषंति छिंदंति १९ ॥

राम कृष्ण

राम० ७३

निम्नयानप्रयासूर्म्याप्रतिमया १९ सर्वाभिगमः पश्वाद्युपगंता २० अपाखंडाः सपाखंडिनः सेतवः श्रुतिनीर्या
नपाठे मेनविशेषणं नदीं विशिनष्टि विण्मूत्रेति २१ पशुचर्यां स्वेच्छाचारम् २२ अतीर्थेनिहत्या तादर्थ्यं

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयंतस्तिग्मया सू
र्म्या लोहमय्या पुरुषमालिंगयंति स्त्रियं वा पुरुषमालिंगयंति स्त्रियं वा पुरुषरूपया सूर्म्या २२ यस्त्वि
ह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति २३ ये त्विह वै राज
न्या राजपुरुषा वा अपाखंडा धर्मसेतून् भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादास्तस्यां
निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमा
नाः स्वाघेन कर्मपाकमनुस्मरंत उपतप्यंते विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहि
न्यामुपतप्यंते २४ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमाः त्यक्तलज्जाः पशुचर्यां चरं
ति ते चापि प्रेत्य विण्मूत्रश्लेष्मलाप्रपूर्णार्णवे निपतंति तदेवातिबीभत्सितमश्नंति २५ ये त्विह
वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेतान् लक्ष्यभूता
न्यमपुरुषा इषुभिर्विध्यंति २६ ये त्विह वै दांभिका दंभयज्ञेषु पशून् विशसंति तानमु
ष्मिंल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसंति २७ यस्त्विह वै सवर्णां भा
र्यां मपह्राद्विजो रेतः पाययति काममोहितः तं पापकृतममुत्र रेतःकुल्यायां पाययित्वा रे
तः सोपाययंति २८ ॥ राम

३ विध्यंतीति रामा प्राणिनिराधो दर्शितः २६ निरयपतयो यमपुरुषाः २७ लालाभक्षनामाह यस्त्विहेति रे
तः पानं कारयति २८ ॥ ॥

यमदूता येश्वानः सरभसं सरभसं प्रभं १९ द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालंबे अवीचिशब्दार्थमाह
यत्रेति वीचिस्तरंगः तद्रहितत्वादवीचिः २० सोविप्रः तत्कलत्रं वा सुरां पिबति अथवा व्रतस्थः सन् राजन्यो वैश्यो

येत्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान्वा विलुंठंति राजानो भटा वा तांश्चापि हि परेतान् यमदूता
वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति १९ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनि
मये दाने वा कथंचित्स वै प्रेत्य नरके वीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपा
त्यते जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पु
नरारोपितो निपतति २० यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोपि वा पिबति प्र
मादतः तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति २१ अथ च य
स्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृ

तक एव मृत्वा क्षारकर्दमे निरयेऽवाक्
शिरा निपातितो दुरंतायातना
ह्यश्नुते २२
॥ २२ ॥

वा सोमपीथः कृतसोमपानः तस्य वयः तयोः सोमस्याने फलेन समविधानात्सोमपाननिषेधाच्च तथापि कृतिः
सुराया अपि भीतः तत्वतः सोपि पिबेदयं सुपसृज्य न स्मे मदं सप्यद्वे न सोमसमिति २१ सर्वमपि स्पष्टं कप्यसन् स्तब्धो
२२ श्रीरामानुजायनमः ॥

पुरुषस्यमेधेनहिंसयाभैरवादीन् यजंतेयाश्चस्त्रियः कामरूपाः रक्षोगणाःशूलायधेहनेपुरुषादाःस्मनः
पूर्वमत्रजंतनहत्न वैस्रंभकैः विश्वासोपायैः उपविस्रंभयाविश्वासस्य ३४ विलशयान् ३५ समारेणासवि

येत्विहवैपुरुषाःपुरुषमेधेनयजंतेयाश्चस्त्रियोनृपशून्खादंतितांश्चतेपशवइहनिहताः यमसदने
यातयंतोरक्षोगणाः सौनिकाइवस्वधितिनावदार्यासृक् पिबंतिनृत्यंतिगायंतिचहृष्यमा
णायथेहपुरुषादाः ३३ येत्विहवाअनागसोरण्येग्रामेवावैस्रंभकैरुपस्रंभयाजिजीविषून्
शूलसूत्रादिषूपप्रोतान् क्रीडनकतयायातयंतितेपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मानः
क्षुत्तृड्भ्यांचाभिहताः कंकवटादिभिश्चेतस्ततः तिग्मतुंडैराहन्यमानाआत्मशमलंस्मरंति ३४
येत्विहवैभूतान्युद्वेजयंतिनराउल्वणस्वभावायथादंदशूकास्तेपिप्रेत्यनरकेदंदशूकाख्येनिपतं
तिं यत्रनृपदंदशूकाः पंचमुखाः सप्तमुखाउपसृत्यग्रसंतियथाबिलेशयान् ३५ येत्विहवा
अंधावटकुसूलगुहादिषुभूतानिनिरुंधंतितथामुत्रतेष्वेवोपवेश्यसगरेणवह्निनाधूमेननिरुंधंति
३६ यस्त्विहवाअतिथीनभ्यागतान्वागृहपतिरसकृदुपगतमन्युर्दिधक्षुरिवपापेनचक्षुषानि
रीक्षतेतस्यचापिनिरयेपापदृष्टेरक्षिणीवज्रतुंडागृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाट
यंति ३७

येण ३६ अतिथयोज्ञातपूर्वाः अभ्यागताः ज्ञातपूर्वाः तान्पापेनवक्रीकृतेन ३७ राम राम ॥

श्रीः भा·पं टी· ७५

आढ्याभिमतिः धनगर्वितः अहंकृतिः श्रेष्ठोहमिति मानी तिर्यक्प्रेक्षणं यस्य सर्वतः गुर्वादेरपि धनं वा व्ययिष्यतीति वि
शंकमानः परिशुष्यमाणं हृदयं वदनं च यस्य अनवगतः अप्राप्तः तस्यार्थस्योत्पादनादिभिः शमलं कष्टं गृह्णातीति तथा परि

यस्त्विह वा आढ्याभिमतिरहंकृतिः तिर्यक्प्रेक्षणः सर्वतोभिविशंकी अर्थविनाशचिंतया परिशुष्यमाण
हृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्र
हः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोंगेषु सूत्रैः परि
वयंति २८ एवंविधा नरका यमालये संति शतशः सहस्रशः तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचि
दिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां नि
विशंति निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पि
त उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णि
तमादृतः पठति शृणोति श्रावयति
स उपगेयं भगवतः परमात्म
नो अग्राह्यमपि श्रद्धाभ
क्तिविशुद्धबुद्धि
र्वेद २९
राम

वयंति स्यूतं कुर्वंति २८ इतरत्र स्वर्गे तदेव इह मर्त्यलोके पुनर्भवे पुनर्जन्मनि निमित्ते उभयोः धर्माधर्मयोः शेषा
भ्यां आदावेव इति षष्ठस्कंधे वैश्वानरं यातीत्यादिना उपगेयं उपाविशद् श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य २९ ॐ नमो
भगवते वासुदेवाय ७५

श्री॰ भा॰ पं॰ टी॰ ट॰

यथावत् कथंभूतायस्या सकलानीनोवनिकायानांभानर्त्रग्रराश्रुतं वध ३॰ इतिश्रीभावार्थ

श्रुत्वास्थूलंतथासूक्ष्मंरूपोभगवतोयतिः स्थूलेनिर्जितमात्मानंशनैःसूक्ष्मंधियानयेदि
ति ३९ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिंनरकभागणलोकसं
स्था गीतामयातववृपाद्भुतमीश्वरस्यस्थू
लेवपुःसकलजीवनिकाय
धाम ३ इतिश्रीमहा
प्रभावेमन्महाभा
गवतेमहापुरा
णेश्रीमच्छुक
देवसंवादे
नरकोनुवर्णनं नाम
षड्विंशोध्यायः
२६ समाप्ता
पंचमे

दीपिकायांपंचमस्कंधेनरकानुवर्णनंनामषड्विंशोध्यायः २६ पंचमस्कंधेसमाप्तः शुभं राम राम

राम॰
ट॰

5

५

८० पंचमस्कंधपत्राणि